११६

इ
~~२६५~~
११७

॥ अथ सभाष्यं विष्णुनामसहस्रं प्रारंभः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ ॥ सच्चिदानंदरूपायकृष्णायाक्लिष्टकारिणे । नमो वेदांतवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥ यस्यस्मरणमात्रेण जन्मसंसारबंधनात् ॥ विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे ॥ २ ॥ कृष्णद्वैपायनव्यासं सर्वलोकहितेरतम् । वेदाब्जभास्करंवन्देशमादिनिलयंमुनिम् ॥ ३ ॥ सहस्रमूर्तेःपुरुषोत्तमस्यसहस्रनेत्राननपादबाहोः । सहस्रनाम्नांस्तवनंप्रशस्तंनिरुच्यतेजन्मजरादिशांत्यै ॥ ४ ॥ वैशंपायनो जनमेजयमुवाच श्रुत्वेति धर्मानभ्युदयनिःश्रेयसोत्पत्तिहेतुभूतान्वेदलक्षणान्अशेषेणकात्स्न्र्येनपावनानिपापक्षयकराणिचसर्वशः सर्वप्रकारैःश्रुत्वायुधिष्ठिरोधर्मपुत्रः शांतनवंशंतनुसुतंभीष्मंसकलपुरुषार्थसाधनंअल्पप्रयासंअनल्पफलं अनुक्त

॥ वैशंपायन उवाच ॥ ॥ श्रुत्वाधर्मानशेषेण पावनानि च सर्वशः ॥ युधिष्ठिरःशांतनवं पुनरेवाभ्यभाषत ॥ १ ॥ युधिष्ठिर उवाच ॥ किमेकं दैवतं लोके किं वाप्येकं परायणम् ॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभम् ॥ २ ॥

मितिकृत्वापुनर्भूयएवाभ्यभाषतप्रश्नंकृतवान् ॥ १ ॥ किमितिकिमेकंदैवतंदेवइत्यर्थः स्वार्थेतद्धितविधानात् लोकेलोकनहेतुभूतेसमस्तविद्यास्थानेउक्तंयदाज्ञयाप्रवर्ततेसर्वे इतिप्रथमःप्रश्नः । किंवाप्येकंपरायणंअस्मिँल्लोकेएकं परायणंकिंपरमयनंप्राप्तव्यंस्थानंयस्मिन्निरीक्षिते"भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः । क्षीयंतेचास्यकर्माणि यस्मिन्दृष्टेपरावरे"यस्यविज्ञानमात्रेणानंदलक्षणो मोक्षः प्राप्यते यद्विद्वान्नबिभेतिकुतश्चनेतियत्प्रविष्टस्यनाविद्यतेपुनर्भवःयस्यचवेदनात्तदेवभवतियद्विहायापरपंथानृणांनास्तितदुक्तभेकंपरायणंलोकेयत्तत्किमितिद्वितीयः प्रश्नः। कंकतमंदेवंस्तुवंतोगुणसंकीर्तनंकुर्वंतःकंकतमंदेवमर्चंतः बाह्यमाभ्यंतरंचार्चनंबहुविधंकुर्वन्तोमानवा मनसुताः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुभंकल्याणंस्वर्गादिफलं प्राप्नुयुर्लभेयुरिति पुनः प्रश्नद्वयम् ॥ २ ॥ कोधर्मःपूर्वोक्तलक्षणःसर्वेषांधर्माणांमध्येभवतःपरमः प्रकृष्टोमतोऽभिप्रेतइतिपंचमःप्रश्नः । किंजपन्नित्यादि किंजप्यंजपन् उच्चोपांशुमानसलक्षणंजपंकुर्वन्जंतुर्जननधर्मा अनेनजंतुशब्देनचजपार्चनस्तवनादिषु यथायोग्यसर्वप्राणिनामधिकारंसूचयति जन्मसंसारबंधनात्जन्माज्ञानविजृंभितानामविद्याकार्याणामुपलक्षणम् संसारोऽविद्याताभ्यांजन्मसंसाराभ्यांयद्बंधनंतस्मान्मुच्यते मुक्तोभवतीतिषष्ठःप्रश्नः । जन्मसंसारबंधनादितीदमुपलक्षणम् इतरेषांफलानामप्येतद्ग्रहणंमोक्षस्यप्राधान्यख्यापनार्थम् ॥ ३ ॥ भीष्मउत्तरमुवाच सर्वेषांशत्रूणांभयहेतुर्भीष्मःमोक्षधर्मादीनांप्रवक्तासर्वज्ञः किमेकमिति

को धर्मः सर्वधर्माणां भवतः परमो मतः ॥ किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात् ॥ ३ ॥ भीष्म उवाच ॥ ॥ जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ४ ॥ तमेवचार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ॥ ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ५ ॥

षट्प्रश्नाःकृताःतत्रपाश्चात्योनंतरोजप्यविशेषः षष्ठःप्रश्नोऽनेनश्लोकेनपरिहीयतेजगत्प्रभुमिति जगत्स्थावरजंगमात्मकंतस्यप्रभुंस्वामिनंदेवदेवंदेवानांदेवंअनंतंदेशतःकालतोवस्तुतश्चापरिच्छिन्नंपुरुषोत्तमंक्षराक्षराभ्यांकार्यकारणाभ्यांउत्कृष्टंनामसहस्रेण नाम्नांसहस्रेणस्तुवन्गुणान्संकीर्तयन्सततोत्थितोनिरंतरमुद्युक्तःपुरुषःपूर्णत्वात् पुरीशयनाद्वापुरुषःसचसर्वदुःखातिगोभवेत् इतिसर्वत्रसंबध्यते ॥ ४ ॥ उत्तरेणश्लोकेनचतुर्थःप्रश्नःसमाधीयतेतमेवचार्चयन्बाह्यार्चनंकुर्वन्नित्यंसर्वेषुकालेषुभक्तिर्भजनंतात्पर्येणतयाभक्त्या पुरुषमव्ययंविनाशक्रियारहितंध्याय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्राभ्यंतरार्चनंकुर्वन्स्तुवन्पूर्वोक्तेननमस्यन्नमस्कारंकुर्वन्पूजाशेषभूतमुभयंस्तुतिनमस्कारलक्षणंकुर्वन् यजमानःपूज
कःफलभोक्ताअथवाऽर्चयन्नित्यनेनोभयविधमर्चनमुच्यते ध्यायंस्तुवन्नमस्यन्निति मानसंवाचिकंकायिकंचोच्यते
॥ ५ ॥ तृतीयंप्रश्नंपरिहरतिउत्तरैस्त्रिभिः पादैः अनादिनिधनंषड्भावविकारवर्जितं विष्णुंव्यापनशीलंसर्वलोक्यते
इतिलोकोदृश्यवर्गःतस्यनियंतॄणांब्रह्मादीनामपीश्वरत्वात् सर्वलोकमहेश्वरःतंलोकंदृश्यवर्गंस्वाभाविकेनबोधेनसा
क्षात्पश्यतीतिलोकाध्यक्षंतंनित्यंनिरंतरंस्तुवन् सर्वदुःखातिगोभवेदिति त्रयाणांप्रश्नानांस्तवनार्चनजपानांसाधार
णंफलवचनंसर्वाण्याध्यात्मिकादीनिदुःखान्यतीत्यगच्छतीतिसर्वदुःखातिगःभवेत्स्यात् ॥ ६ ॥ तमेवस्तुत्यांविशि

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्
॥६॥ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥७॥
एष मे सर्वधर्माणां धर्मोधिकतमो मतः ॥ यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८ ॥

नष्टि ब्रह्मण्यमिति ब्रह्मण्यंब्रह्मणेस्त्रष्टेब्राह्मणायतपसेश्रुतयेहितंसर्वान्धर्मान्जानातीतिसर्वधर्मज्ञःतं लोकानांप्रा
णिनांकीर्तिर्यशांसिस्वशक्त्यानुप्रवेशेनवर्धयतीति तम् लोकैर्नाथ्यतेयाच्यतेलोकानुपतापयतेशास्तेलोकानामीष्ट
इतिवा लोकनाथःतं महत्ब्रह्म विश्वोत्कर्षेणवर्तमानत्वात्महद्भूतं परमार्थसत्यं सर्वभूतानांभवः संसारोयत्सका
शादुद्भवतीतिसर्वभूतभवोद्भवस्तम् ॥ ७ ॥ पंचमंप्रश्नंपरिहीयते एषइति सर्वेषांवेदलक्षणानांधर्माणामेषवक्ष्यमा
णोधर्मोऽधिकतमइति मे ममतोऽभिप्रेतः यद्भक्त्यातात्पर्येण पुंडरीकाक्षंहृदयपुंडरीकेप्रकाशमानंवासुदेवं स्त
वैर्गुणसंकीर्तनलक्षणैःस्तुतिभिः सदाऽर्चेत्सत्कारपूर्वकमर्चनंकरोति नरोमनुष्यइति यत्एष धर्मइतिसंबंधःअस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तुतिलक्षणस्यार्चनस्याधिक्येकिंकारणमुच्यतेहिंसादिपुरुषांतरद्रव्यदेशकालादिनियमानपेक्षत्वाच्चाधिक्येकारणम् "ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन् । यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवम्" इति विष्णुपुराणे "जप्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः । कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते' इतिमानवंवचनम् एतत्सर्वमभिप्रेत्य "एष मे सर्वधर्माणां धर्मोधिकतमो मत" इति उक्तम् ॥ ८ ॥ द्वितीयंप्रश्नंसमधतेपरममितिपरमंप्रकृष्टं महद्बृहत्तेजश्चैतन्यलक्षणंसर्वावभासकम् श्रुतिश्च "येनसूर्यस्तपतितेजसेद्धस्तद्देवाज्योतिषांज्योतिर्नतत्रसूर्योभाति नचंद्रतारक" मित्यादिश्रुतेः "यदादित्यगतंतेज" इत्यादिस्मृतेश्चपरमंतपतइत्याज्ञापयतीति तपः "यइमंचलोकंपरमंचलोकंसर्वाणिचभूतानियोंतरोयमयती" त्यंतर्यामिब्राह्मणे सर्वनियंतृत्वंश्रूयते "भीषास्माद्वातः पवत"

परमं यो महत्तेजः परमं यो महत्तपः ॥ परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९ ॥
पवित्राणां पवित्रं यो मंगलानां च मंगलम् ॥ दैवतं देवतानां च भूतानां योव्ययः पिता ॥ १० ॥

इत्यादितैत्तिरीयके तपतीष्टइतिवातपः "भीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युधावतिपंचम" इत्यादिचतस्यैश्वर्यंअनवच्छिन्नमतिमहत्त्वं "एष सर्वेश्वर" इत्यादिश्रुतेः परमं सत्यादिलक्षणं ब्रह्म महनीयतयामहत्परमं प्रकृष्टं परायणं पुनरावृत्तिशंकारहितम् परमग्रहणात्सर्वत्र परं तेजआदित्यादिकं व्यावर्त्यतेसर्वत्र योदेवइतिविशेष्यतेचयोदेवः परमंतेजः परमंतपःपरमंब्रह्म परमंपरायणंसएकं सर्वभूतानांपरायणमितिवाक्यार्थः ९ इदानींप्रथममश्नस्योत्तरमाह पवित्राणांपवित्रं पावनानां तीर्थादीनां परमस्तु पुमान् ध्यातोदृष्टः कीर्तितश्च स्तुतःसंपूजितः स्मृतःप्रणतःपाप्मनःसर्वानुन्मूलयतीति परमंपवित्रंसंसारबंधहेतुभूतं पुण्यापुण्यात्मकंकर्म तत्कारणं चाज्ञानंसर्वना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शयन्स्वयाथात्म्यज्ञानेनेति वा पवित्राणां पवित्रं "रूपमारोग्यमर्थांश्चभोगांश्चैवानुषंगिकान् । ददाति ध्यायतो नि
त्यमपवर्गप्रदोहरिः । चिंत्यमानः समस्तानां क्लेशानां हानिदो हरिः । समुत्सृज्याखिलं चान्यः सोच्युतः किं
न चिंत्यते । ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वैश्रुतिः । अतिपा
तकयुक्तोपि ध्यायन्निमिषमच्युतं । भूयस्तपस्वी भवति पंक्तिपावनपावनः । आलोड्यसर्वशास्त्राणिविचार्यचपुनः
पुनः । इदमेकंसुनिष्पन्नंध्येयोनारायणःसदा हरिरेकःसदा ध्येयोभवद्भिःसत्त्वसंस्थितैः । ओमित्येवंसदाविप्राःपठत
ध्यातकेशवं । भिद्यतेहृदयग्रंथिश्छिद्यंते सर्वसंशयाः । क्षीयंतेचास्यकर्माणितस्मिन् दृष्टेपरावरे । यन्नामकीर्तनंभक्त्या
विलापनमनुत्तमं । मैत्रेयाशेषपापानांधातूनामिवपावकः । अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः । पुमान्विमुच्य
तेसद्यःसिंहत्रस्तैर्मृगैरिव । ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन् । यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवं ।
हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः । अनिच्छयापिसंस्पृष्टो दहत्येव हि पावकः । ज्ञानतोऽज्ञानतो वापि
वासुदेवस्य कीर्तनात् । तत्सर्वं विलयं याति तोयस्थंलवणं यथा । यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि
यच्चिंतने विघ्नो यत्र निवेशितात्ममनसोब्राह्मोपिलोकोल्पकः । मुक्तिंचेतसियत्स्थितोऽमलधियांपुंसांददात्यव्य
यःकिंचित्रंतदघंप्रयातिविलयंतत्राच्युते कीर्तिते । शमायालंजलंवह्नेस्तमसोभास्करोदयः । शांतिकालेह्यघौ
घस्यनामसंकीर्तनंहरेः । हरेर्नामैवनामैवनामैवममजीवनं । कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्यथा ॥ स्तुत्वा
विष्णुंवासुदेवंविपापोजायतेनरः । विष्णोः संपूजनान्नित्यंसर्वपापंप्रणश्यति । सर्वदासर्वकार्येषुनास्तितेषाममंगलं ।
येषांहृदिस्थोभगवान्मंगलायतनंहरिः । गंगास्नानसहस्रेषुपुष्करस्नानकोटिषु । यत्पापंविलयंयातिस्मृतेनश्यति
तद्धरौ । प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै । यानितेषामशेषाणांकृष्णानुस्मरणंपरम् । कलिकल्मषमत्युग्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नरकीर्तिप्रदंनृणाम् । प्रयातिविलयंसद्यःसकृद्यत्रापिसंस्मृते । सकृत्स्मृतोपिगोविंदोनृणांजन्मशतैःकृतं । पापराशिंदहत्याशुतूलराशिमिवानलः । यथाग्निरुद्धूतशिखःकक्षंदहतिसानिलः । तथाचित्तस्थितोविष्णुर्योगिनांसर्वकिल्बिषं"ईश्वरोदेवींप्रत्याहमुक्तिकारणम् । "यावज्जीवंप्रणवमथवावर्तयेद्रौद्रियंवायाजुर्वेद्यंवसतिमथवावारणस्यांविदध्यात् । हित्वालज्जांकलिमलकुलच्छेदनानीरयेद्वाविष्णोर्नामान्यनिशमथवामुक्तिरेषाचतुर्धा । जनार्दनंभूतपतिंजगद्गुरुंस्मरन्मनुष्यःसततंमहामुने । दुःखानिसर्वाण्यपहंतिसाधयत्यशेषकार्याणिचयान्यभीप्सते । कलावत्रापिदोषाढ्येविषयासक्तमानसः । कृत्वापिसकलंपापंगोविंदंसंस्मरञ्छुचिः । वासुदेवेमनोयस्यजपहोमार्चनादिषु । तस्यांतरायोमैत्रेयदेवेंद्रत्वादिकंफलम् । लोकत्रयाधिपतिमप्रतिमप्रभावभीषत्प्रणम्यशिरसाप्रभविष्णुमीशम् । जन्मांतरप्रलयकल्पसहस्रजातमाशुप्रणाशमुपयातिनरस्यपापम् । एकोपिकृष्णस्यकृतप्रणामोदशाश्वमेधावभृथेनतुल्यः । दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भवाय । अतसीपुष्पसंकाशंपीतवाससमच्युतम् । येनमस्यंतिगोविंदंनतेषांविद्यतेभयम् । शाठ्येनापिनमस्कारः प्रयुक्तश्चक्रपाणये । संसारस्थूलबंधानामुद्वेजनकरोहिसः" इत्यादिश्रुतिस्मृतीतिहासपुराणेभ्यः मंगलं सुखं तत्साधनं तत्र ज्ञापकंचतेषामपि परमानंदलक्षणंपरंमंगलमिति । मंगलानांचमंगलंदैवतंदेवतानांचदेवानांदेवःद्योतनादिभिःसमुत्कर्षेणवर्तमानत्वात् भूतानांयोऽव्ययःव्ययरहितः । पिताजनकोयोदेवःसएकंदैवतंलोकइतिवाक्यार्थः । "एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा । कर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्च । योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये "इतिश्वेताश्वेतराणांमंत्रोपनिषदि"सो यंदेवतऐक्षतएकमेवाद्वितीय "मितिछांदोग्ये "हिरण्यगर्भ"इत्यष्टौमंत्राः 'कस्मैदेवाये, त्यत्रएकारलोपेनैकदैवतम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिपादकस्तैत्तिरीयके "अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबहिश्च । वायुर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव । एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्च । एकोत्तरःसर्वभूतांतरात्माएकंरूपंबहुधा यःकरोति । तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषां । सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः । एकस्तथासर्वभूतांतरात्मानलिप्यतेसर्वदुःखेनबाह्यः । नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान् । तमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषा"मितिकाठके । "ब्रह्मवा इदमग्रआसीदेकमेवनान्यदतोसिद्रष्टे" त्यादिबृहदारण्यके "अनेजदेकंमनसोजवीयः तत्रकोमोहःकःशोकःएकमनुपश्यतइतिईशावास्ये"आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्।सर्वेषांभूतानामंतरःपुरुषः समआत्मेतिविद्यात्एकंसद्विप्राबहुधावदंतिएकंसंतंबहुधाकल्पयंति द्यावाभूमीजनयन्देवएकःएकोदाधारभुवनानिविश्वे" तिऋग्वेदे"सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः । विद्याविनयसंपन्नेब्राह्मणेगविहस्तिनि"अहमात्मागुडाकेश सर्वभूताशयस्थितः । यदाभूतपृथग्भावमेकस्थमनुपश्यति यथाप्रकाशयत्येकः "सर्वधर्मान्परित्यज्यमामेकंशरणं व्रजे"तिगीतोपनिषत्सु । "भवतिमनोर्माहात्म्यख्यापनीश्रुतिः"। "एतद्वैकिंचमनुरवदत्तद्भेषज'मिति । मनुनाचोक्तं।"सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि संपश्यन्नात्मयाजीवैस्वाराज्यमधिगच्छतीति"। सृष्टिस्थित्यंतकरणीं ब्रह्माविष्णुशिवात्मिकां । ससंज्ञांयातिभगवानेकएवजनार्दनः । तस्मान्नविज्ञानमृतेस्तिकिंचित्काचित्कदाचिद्विजवस्तुजातम् । विज्ञातमेकंनिजकर्मभेदाद्विभिन्नचित्तैर्बहुधाभ्युपेतम् । ज्ञानंविशुद्धंविमलंविशोकमशेषलोमादिनिरस्तसंगं । एकंसदेकःपरमःपरेशःसवासुदेवोनयतोस्तिकिंचित् । यदासमस्तदेहेषुपुमानेकोव्यवस्थितः । तदाहि को भवान् कोहमेत्यतद्विफलं वचः । सितनीलादिभेदेनयथार्को दृश्यते नभः । भ्रांतदृष्टिभिरात्मापि तथैकः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सन्पृथक्पृथक् । "एकःसमस्तंयदिहास्तिकिंचित्तदच्युते नास्तिपरंततोन्यत् । सोहं स च त्वं स च सर्वमेतदात्मस्व रूपंत्यज भेदमोहं । इतीरितस्तेनसराजवर्यस्तत्त्याज भेदं परमार्थदृष्टिः" । यमेनोक्तम् "सकलमिदमहं चवासुदे वः परमपुमान् परमेश्वरःसएकः । इतिमतिरचला भवत्यनंतेहृदयगतेव्रजतान्विहायदूरात् । यथाहवसुधासर्वस त्यमेवादिवौकसः । अहंभवोभवंतश्चसर्वनारायणात्मकं । विभूतयस्तुयास्तस्यतासामेव परस्परम् । आधिक्यं न्यू नताबाध्यबाधकत्वेन वर्तते । भवानहंचविश्वात्मन्नेकएवहिकारणम् । जगतोस्यजगत्यर्थेभेदेनावांव्यवस्थितौ । त्वयायदभयं दत्तं तद्दत्तमखिलंमया । मत्तोविभिन्नमात्मानंद्रष्टुंनार्हसिशंकर । योहंसत्वंजगच्चेदंसदेवासुरमानुषम् अविद्यामोहितात्मानः पुरुषाभिन्नदर्शिनः" । इतिविष्णुपुराणे । "विष्णोरन्यंतुपश्यंतियेमीब्राह्मणमेवच । कुत र्कमतयोमूढाःपच्यंतेनरकेशुचौ । येचमूढादुरात्मानोभिन्नंपश्यंतिमांहरेः । ब्रह्माणंचतथातेषांभ्रूणहत्यासमंत्व

यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥ ११ ॥

घ,,मितिभविष्योत्तरपुराणेमहेश्वरवचनम् । तथाचहरिवंशेकैलासयात्रायांमहेश्वरवचनम् । "आदिस्त्वंसर्वभा वानांमध्यमंतस्तथाभवान् । त्वत्तःसर्वमभूद्विश्वंत्वयिसर्वंप्रलीयते । अहंत्वंसर्वगोदेवत्वमेवाहंजनार्दन । आवयो रंतरंनास्तिशब्दैरर्थैर्जगत्त्रये । नामानितवगोविंदयानिलोकेमहांतिच । तान्येवममनामानिनात्रकार्याविचार णा । त्वदुपासाजगन्नाथसैवास्तुममगोपते । यश्चत्वांद्विषतेदेवसमांद्वेष्टिनसंशयः । त्वद्विस्तारोयतोदेवाअहंभू तपतिस्ततः । नतदस्तिविभोदेवयत्तेविरहितंक्वचित् । यदासीद्वर्ततेयच्चयच्चभाविजगत्पते । सर्वंत्वंदेवदेवशविना किंचित्त्वयानही"त्यादिवाक्यान्येकत्वप्रतिपादकानि ॥ १० ॥ यदेकंदैवतंप्रस्तुतंतस्योपलक्षणमुच्यतेयतोय स्मात्सर्वाणिभूतानिसंभवंतिउद्भवंतिचआदियुगागमेकल्पादौयस्मिंश्चप्रलयंविलयंयांतिविनाशंगच्छंतिपुनर्भूयए

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेत्यवधारणार्थः नान्यस्मिन्नित्यर्थः युगक्षयेमहाप्रलयेचकारान्मध्येपियस्मिंस्तिष्ठंति "यतोवाइमानिभूतानि जायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंती"तिश्रुतेः ॥ ११ ॥ तस्यैवंलक्षितस्यैकदैवतस्यलोकप्रधानस्य लोकहेतुभिःप्रतिपाद्यस्यजगन्नाथस्यभूपतेः महीपालविष्णोर्व्यापनशीलस्यनाम्नांसहस्रंअशुभकर्मकृतंपापंसंसारल क्षणभयंचापहंतीतिपापभयापहंमेमत्तःशृणुएकाग्रमनाभूत्वाऽवधारयेत्यर्थः ॥ १२ ॥ "एकस्यैवसमस्तस्यब्रह्म णोद्विजसत्तम । नाम्नांबहुत्वंलोकानामुपकारकरंशृणु । निमित्तशक्तयोनाम्नांभेदिन्यस्तदुदीरणात् । विभिन्नान्ये वसाध्यंतेफलानिद्विजसत्तम । यच्छक्तिमन्नामयस्यतत्तस्मिन्नेववस्तुनि । साधकंपुरुषव्याघ्रसौम्येक्रूरेषुवस्तुषु"

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ॥ विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ ॥ १२ ॥ यानि नामानि गौणानि विख्यातानि महात्मनः ॥ ऋषिभिः परिगीतानि तानिवक्ष्यामि भूतये ॥ १३ ॥

इति । विष्णुधर्मवचनाद्यद्यपिपरस्यब्रह्मणःषष्ठीगुणक्रियाजातिरूढानांशब्दप्रवृत्तिहेतूनांनिमित्तशक्त्यादीनां चासंभवस्तथापिसगुणेब्रह्मणिसर्वकारणेचसर्वात्मत्वात्तेषांशब्दप्रवृत्तिहेतूनां संभवात् सर्वेशब्दाअपरस्मि न्पुंसिवर्ततेतत्रयानिनामानिगौणानिगुणयोगात्प्रवृत्तानितेषुयानिविख्यातानि प्रसिद्धानिऋषिभिर्मंत्रद्रष्टृभि श्चपरिगीतानितानिभूतयेपुरुषार्थचतुष्टयसिद्ध्यैमहांश्चासावात्मेतिमहात्मा "यच्चाप्नोतियदादत्तेयच्चात्तिविषया निह । यच्चास्तिसंततोभावस्तस्मादात्मेतिकीर्त्यते" इतिवचनादयमेवमहानात्मातस्यार्चित्यप्रभावस्यता निवक्ष्यामि । भूतये पुरुषार्थचतुष्टयार्थिनामिति ॥ १३ ॥ अत्र नामसहस्रे आदित्यादिशब्दाना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मर्थांतरेप्रसिद्धानामादित्याद्यर्थानां ताद्विभूतित्वेन तदभेदात् तस्यैवस्तुतिरिति प्रसिद्धार्थग्रहणेपि स्तुतित्वं "भूतात्मा चेंद्रियात्मा च प्रधानात्मा तथा भवान् । आत्मा च परमात्माचत्वमेकः पंचधास्थितः । ज्योतींषि विष्णुर्भुवनानि विष्णुर्भुवनानिविष्णुर्गिरयो दिशश्च । स एव सर्वोभुवनैकरूपो यदस्ति यत्रास्ति च विप्रवर्ये" ति विष्णुपुराणे । " आदित्यानामहंविष्णु"रित्यारभ्याथवा बहुनैतेन किं ज्ञातेनतवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेनस्थितो जगदि"ति श्रीगीतोपनिषत्सु भगवतैवोक्तम्"ब्रह्मैवेदं विश्वमिदंवरिष्ठं" "पुरुष एवेदं सर्वमि"ति श्रुतिभ्यः विष्ण्वादिशब्दानांपुनरुक्तानामपि वृत्तिभेदादपौनरुक्त्यम् श्रीपतिर्माधव इत्यादीनां वृत्त्यैकत्वेपि शब्दभेदान्न पौनरुक्त्यम् विशेष्यैक्ये अर्थैक्येपौनरुक्त्यं तु न दोषाय नाम्नां सहस्रस्य किमेकं दैवतामिति प्रष्टैकदेवतविषयत्वात् यत्र पुंलिंगशब्दप्रयोगस्तत्र विष्णुर्विशेष्यो यत्र स्त्रीलिंगशब्दप्रयोगस्तत्रदेवता विशिष्यते यत्र नपुंसकप्रयोगस्तत्र ब्रह्मविशेषणीयम्"यतः सर्वाणि भूतानी"त्यारभ्य जगदुत्पत्तिस्थितिलयकारणस्य ब्रह्मण एकदैवतत्वेनाभिहितत्वादादावुभयविधं ब्रह्म विश्वशब्देनोच्यते विश्वमिति विश्वस्य जगतः कारणत्वेनविश्वमित्युच्यते ब्रह्म आदौ तु विश्वमिति कार्यशब्देन कारणग्रहणम् कार्यभूतांविरिंच्यादिनामभिरुपपन्नास्तुतिर्विष्णोरिति दर्शयितुं यद्वा परस्मात्पुरुषान्न भिन्नमिदं विश्वं परमार्थतस्तेन विश्वमित्यभिधीयते ब्रह्म"ब्रह्मैवेदंविश्वमिदंवरिष्ठम्पुरुषएवेदंविश्व"मिति श्रुतेःताद्भिन्नंकिंचित्परमार्थतःसदस्तिअथवाविशतीतिविश्वंब्रह्म "तत्सृष्ट्वातदेवानुप्राविशदि"तिश्रुतेःकिंचसंहृतौविशंतिसर्वाणिभूतान्यस्मिन्नितिविश्वं ब्रह्म"यत्प्रयंत्यभिसंविशंती"ति श्रुतेःतथाहिसकलंजगत्कार्यभूतमेषविशत्यत्रचाखिलंविशतीत्युभयथापि विश्वंब्रह्म'तपोब्रह्मपरामत'मिति श्रुतेः । नाचिकेतसाष्टष्टेमृत्युरुवाच"अन्यत्रधर्मादन्यत्राधर्मा"दित्यारभ्य "सर्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंतियदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीमिॐमित्येतत्एतद्धयेवाक्षरंब्रह्मएतद्धयेवाक्षरंपरं । एतद्धयेवाक्षरं ज्ञात्वायोयदिच्छतितस्यतत्ॐमितिब्रह्मॐमितीदंसर्वं तद्यथा शंकुनासर्वाणिपर्णानिसंतृणानिएवमोंकारेणसर्वावाक्संतृणाएतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकार इत्युपक्रम्य "यःपुनरेतंत्रिमात्रेणॐमित्येतेनचअक्षरेणपरंपुरुषमभिध्यायतिॐकारएवेदंसर्वंॐमित्येतदक्षरमिदंसर्वमि"त्युपक्रम्य"प्रणवोह्यपरंब्रह्मप्रणवश्चपरं स्मृतम् । अपूर्वोनंतरोबाह्योनपरःप्रणवेऽव्ययः । सर्वस्यप्रणवोह्यादिर्मध्यमंतस्तथैवच । एवंहिप्रणवंज्ञात्वाव्यश्नुतेतदनंतरम् । प्रणवं हीश्वरंविद्यात्सर्वस्यहृदयेस्थितम् । सर्वव्यापिनमोंकारंमत्वाधीरोनशोचति । अमात्रोनंतमात्रश्चद्वैतस्योपशमःशिवः । ॐकारोविदितोयेनसमुनिनतरोजन"इत्यं

ॐम् ॥ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः १४

तामांडूक्योपनिषत्"ॐतद्ब्रह्मॐतद्वायुः ॐतदात्माॐतत्सत्यंॐतत्सर्वंॐतत्पुरोर्नमः "इत्यादिश्रुतिभिः ॐमित्येकाक्षरंब्रह्म" " रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः । प्रणवःसर्ववेदेषुगिरामस्म्येकमक्षरम् । आद्यंचाव्यक्षरंब्रह्मत्रयीयास्मिन्प्रतिष्ठिता । एकाक्षरंपरंब्रह्मप्राणायामःपरंतपः । प्रणवाद्यास्तथावेदाः प्रणवेपर्यवस्थिताः । वाङ्मयंप्रणवंसर्वंतस्मात्प्रणवमभ्यसेत्"इत्यादिस्मृतेश्च विश्वशब्देनोंकारो व्यभिधीयतेवाच्यवाचकयोरत्यंतभेदाभावात् विश्वमित्योंकारएवब्रह्मेत्यर्थः । सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीतेति । एतदुक्तंभवति । यस्मात्सर्वमिदंविकारजातं ब्रह्मतज्जत्वात्तल्लयत्वात्तदनत्वाच्च । नचसर्वस्यैकात्मत्वेरागादयः संभवंति । तस्माच्छांतउपासीतेतिश्रुतेः । "श्रूयतांधर्मसर्वस्वंश्रुत्वाचैवावधार्यतां ॥ आत्मनःप्रतिकूलानिपरेषांन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समाचरेत् ॥ आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन ॥ सुखंवायदिवादुःखंसयोगीपरमोमतः ॥ निर्गुणःपरमात्मा
त्रदेहंव्याप्यव्यवस्थितः ॥ तमहंज्ञानविज्ञेयंनावमन्येनलंघये ॥ यद्यागमैर्नविदेयंतमहंभतभावनं ॥ क्रमेयंत्वांगि
रिंचेमंहनूमानिवसागरं ॥ बद्धवैराणिभूतानिद्वेषंकुर्वंतिचेत्ततः ॥ शोच्यान्यहोतिमोहेनव्याप्तानीतिमनीषिणां ॥
एतेमित्रदृशादैत्याविकल्पाःकथितामया ॥ कृत्वाभ्युपगमंतत्रसंक्षेपःश्रूयतांमम ॥ विस्तारःसर्वभूतस्यविष्णोःस
र्वमिदंजगत् ॥ द्रष्टव्यमात्मवत्तस्मादभेदेनविचक्षणैः ॥ समुत्सृज्यासुरभावंतस्माद्यूयंतथावयं ॥ तथायत्नंकरि
ष्यामोयथाप्राप्स्यामनिर्वृतिं ॥ सर्वत्रदैत्याःसमतामुपेतसमत्वमाराधनमच्युतस्य ॥ नमंत्रादिकृतस्तातनचनैस
र्गिकोमम ॥ प्रभावएषसामान्योयस्ययस्याच्युतोहृदि ॥ अन्येषांयोनपापानिचितयत्यात्मनोयथा ॥ तस्यपा
पागमस्तातहेत्वभावान्नविद्यते ॥ कर्मणामनसावाचापरपीडांकरोतियः ॥ तद्धीजंजन्मफलतिप्रभूतंतस्यचाशुभ
म् ॥ सोहंनपापमिच्छामिनकरोमिवदामिवा ॥ चिंतयन्सर्वभूतस्थमात्मन्यपिचकेशवम् ॥ शारीरंमानसंवाग्जं
दैवंभूतभवंतथा ॥ सर्वत्रसमचित्तस्यतस्यमेजायतेकुतः ॥ एवंसर्वेषुभूतेषुभक्तिरव्यभिचारिणी ॥ कर्त्तव्यापंडितैर्ज्ञा
त्वासर्वभूतमयोहरिः ॥ सामंचोपप्रदानंचभेददंडौतथापरौ ॥ उपायाःकथिताह्येतेमित्रादीनांचसाधने ॥ ताने
वाहंनपश्यामिमित्रादींस्तातमाक्रुधः ॥ साध्याभावेमहाबाहोसाधनैःकिंप्रयोजनम् ॥ सर्वभूतात्मकेतातजगन्नाथे
जगन्मये ॥ परमात्मनिगोविंदेमित्रामित्रकथाकुतः ॥ जडानामविवेकानामशूराणामपिप्रभो ॥ भाग्यभोग्या
निराज्यानिसंत्यऽनीतिमतामपि ॥ तस्माद्यतेतपुण्येषुयइच्छेन्महतींश्रियम् ॥ यतितव्यंसमत्वेचनिर्वाणमपिचे
च्छता ॥ देवामनुष्याःपशवःपक्षिकीटसरीसृपाः ॥ रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितम् ॥ एतद्विजानतास
र्वंजगत्स्थावरजंगमम् ॥ द्रष्टव्यमात्मवद्विष्णुर्यतोयंविश्वरूपधृक् ॥ एवंज्ञातेसभगवानमादिपरमेश्वरः ॥ प्रसीद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्यच्युतस्तस्मिन्प्रसन्नेक्लेशसंक्षयः ॥ शंकरहिरण्यगर्भौहरेर्भिन्नाविति नमंतव्यं ॥ विष्णोरन्यंतुपश्यंतियेमामि
त्यादिपूर्ववत् ॥ बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते ॥वासुदेवःसर्वमितिसमहात्मासुदुर्लभ"इत्यादिवचनैश्च ॥
हिंसादिरहितेनस्तुतिनमस्कारादिकर्त्तव्यमितिदर्शयितुंविश्वशब्देनब्रह्माभिधीयतइतिवा " मत्कर्मकृन्मत्परमो
मद्भक्तःसंगवर्जितः ॥ निर्वैरःसर्वभूतेषुयःसमामेतिपांडवेति ॥ नचलतिनिजवर्णधर्मतोयःसममतिरात्मसुहृद्विपक्षप
क्षे ॥ नहरतिनचहंतिकिंचिदुच्चैःशुद्धमनसंतमवैहिविष्णुभक्तं ॥ विमलमतिरमत्सरःप्रशांतःशुचिचरतोऽखिलसत्व
मित्रभूतः ॥ प्रियहितवचनोऽस्तमानमायोवसतिसदाहृदितस्यवासुदेवः ॥ सकलमिदमहंचवासुदेवःपरमपुमान्प
रमेश्वरःसपकः ॥ इतिमतिरचलाभवत्यनंतेहृदयगतेव्रजतान्विहायदूरात् ॥ यमनियमविधूतकल्मषाणामनुदिनम
च्युतसक्तमानसानां ॥ अपगतमदमानमत्सराणांव्रजभटदूरतरेणमानवानामि"त्यादिवचनैर्वैष्णवलक्षणस्यैवंप्रका
रत्वाच्चहिंसादिरहितेनाविष्णोः स्तुतिनमस्कारादिकर्तव्यमिति ॥"श्रद्धयादेयंअश्रद्धयाऽदेयंश्रद्धयाग्निःसमिद्धय
त"इत्यादिश्रुतेः ॥ "श्रद्धापूतंवदान्यस्यहतमश्रद्धयेतरत् ॥ इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः ॥ अश्रो
त्रियंश्राद्धमधीतमव्रतमदक्षिणंयज्ञमनृत्विजाहुतं ॥ अश्रद्धयादत्तमसंस्कृतं हविर्भागाः षडेते तव दैत्यसत्तम ॥
पुण्यंमद्वेषिणांयच्चमद्भक्तद्वेषिणांतथा ॥ क्रयविक्रयसक्तानांपुण्यंयच्चाग्निहोत्रिणां ॥ अश्रद्धयाचयद्दानंयजतां
ददतांतथा । तत्सर्वंतवदैत्येंद्रमत्प्रसादाद्भविष्यति ॥ अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत् ॥ असदित्यु
च्यतेपार्थनचतत्प्रेत्यनोइहे"त्यादिस्मृतिभिश्चश्रद्धयास्तुतिनमस्कारादिकर्तव्यमश्रद्धयानकर्त्तव्यं ॥ "ॐतत्स
दितिनि र्देशोब्रह्मणस्त्रिविधःस्मृत"इतिभगवद्वचनात् । स्तुतिनमस्कारादिकंकर्मसात्विकंविगुणमपिश्रद्धापूर्वकं
ब्रह्मणोऽभिधानत्रयप्रयोगेणसगुणंसात्विकंसंपादितंभवति । आत्मानंविष्णुंध्यात्वाऽर्चनस्तुतिनमस्कारादिकर्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यं ॥ "नाऽविष्णुःकीर्त्तयेद्विष्णुंनाविष्णुर्विष्णुमर्चयेत् ॥ नाविष्णुःसंस्मरेद्विष्णुंनाविष्णुर्विष्णुमाप्नुयादिति महाभार
तेकर्मकांडे ॥ "सर्वाण्येतानिनामानिपरस्यब्रह्मणोनघ ॥ सर्वकामानवाप्नोतिसमाराध्यजगद्गुरुं ॥ तन्मयत्वेनगोविंद
मित्येतद्दालभ्यनान्यथा ॥ तन्मयोवांछितान्कामान्यदवाप्नोतिमानव" इतिविष्णुधर्मे । सर्वभूतस्थितंयोमांभजत्येक
त्वमास्थितः ॥ सर्वथावर्तमानोपिसयोगीमयिवर्त्तत" इतिभगवद्गीतासु ॥ अहंहरिःसर्वमिदंजनार्द्दनोनान्यततः कारण
कार्यजातं ॥ इदंहमनोयस्यनतस्यभूयोभवोद्भवाद्वंद्वगदाभवंतीति विष्णुपुराणे ॥ "गुरोर्यत्रपरीवादोनिंदावापिप्रवर्त्त
ते ॥ कर्णौतत्रपिधातव्यौगंतव्यंवाततोन्यतः ॥ तस्माद्ब्रह्मैवाचार्यस्वरूपेणावतिष्ठती" तिव्यासस्मृतेः । "वरंहुतवह
ज्वालापुंजस्यांतर्व्यवस्थितिः ॥ नशौरिचिंताविमुखजनसंवासवैशसमि" तिकात्यायनवचनात् । यत्रदेशेवासुदे
वनिंदातत्रवासोनकर्त्तव्यः । एतदुक्तंभवति । "यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ । तस्यैतेकथिताह्यर्थाःप्रकाशं
तेमहात्मन" इतिश्वेताश्वतरोपनिषन्मंत्रवर्णात्हरौगुरौचपराभक्तिःकार्येति । "अवशेनापियन्नाम्निकीर्तितेसर्वपात
कैःपुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव ॥ ज्ञानतोऽज्ञानतोवापिवासुदेवस्यकीर्त्तनात् ॥ तत्सर्वंविलयंयातितोयस्थं
लवणंयथा ॥ कलिकल्मषमत्युग्रंनरकार्तिप्रदंनृणां ॥ प्रयातिविलयंसद्यःसकृत्कृष्णस्यसंस्मृतेः ॥ सकृत्स्मृतोपिगोवि
दोनृणांजन्मशतैःकृतं ॥ पापराशिंदहत्याशुतूलराशिमिवानलः ॥ सकृदुच्चरितंयेनहरिरित्यक्षरद्वयं ॥ बद्धःप
रिकरस्तेनमोक्षायगमनंप्रति ॥ एकोपिकृष्णस्यकृतःप्रणामोदशाश्वमेधावभृथेनतुल्यः ॥ दशाश्वमेधीपुनरेतिजन्म
कृष्णप्रणामीनपुनर्भवाय" । एवमादिवचनैःश्रद्धाभक्त्योरभावेपिनामसंकीर्त्तनंसमस्तदुरितंनाशयतीतिमंतव्यंकिमु
तसहस्रनामसंकीर्त्तनंनाशयतीति । 'मनसाअग्रेसंकल्पयत्यथवाचाव्याहरति । यद्वैमनसाध्यायतितद्वाचावदती'
तिश्रुतिभ्यांस्मरणंध्यानंचनामसंकीर्त्तनेंतर्भूतं । नामशक्तितात्पर्यावधारणं । "यस्मिन्न्यस्तमतिर्नयातिनरकंस्वर्गो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पिय श्चितने । विश्रोयत्रनिवेशितेचमनसिब्राह्मोपिलोकोल्पकः ॥ मुक्तिचेतसियःस्थितोऽमलधियांपुसांददा त्यव्ययः । किंचित्रंयदघंप्रयातिविलयंतत्राच्युतेकीर्तित"इतिविष्णुपुराणांते श्रीपाराशरेणोपसंहृतं। 'आलोड्य सर्वशास्त्राणिविचार्यचपुनःपुनः ॥ इदमेकंसुनिष्पन्नंध्येयोनारायणःसदे'तिश्रीमहाभारतांतेभगवताश्रीवेदव्यासे नोपसंहृतं ॥ हरिरेकःसदाध्येयोभवद्भिःसत्वसंस्थितैः ॥ ॐमित्येवंसदाविप्राःपठध्वंध्यातकेशवमि'तिहरिवं शे ॥ कैलासयात्रायांहरिरेकोध्यातव्यइत्युक्तंमहेश्वरेणापि ॥ एतत्सर्वमभिप्रेत्यैषमेसर्वधर्माणांधर्मोधिकतमो मतइत्याधिक्यमुक्तम् ॥ "किमेकं दैवतं लोके किं वाप्येकं परायणं । यतःसर्वाणी"त्यादिना यद्ब्रह्मोक्तं तद्विश्व शब्देनोक्तमिति व्याख्यातं तत्किमित्याकांक्षायामाह विष्णुरिति । तथाचऋग्वेदे"तमुस्तोतारःपूर्व्यंयथाविदऋत स्यगर्भंजनुषापिपर्तन । आस्यजानंतो नामचिद्विवक्तनमहस्ते विष्णो सुमतिं भजामह"इत्यादिश्रुतिभिर्वि ष्णोर्नामसंकीर्तनं सम्यक्ज्ञानप्राप्तयेविहितं । तमेवस्तोतारःपुराणं यथाज्ञानेनसत्यस्यगर्भंजन्मसमाप्तिंकुरुत । जानंतः आअस्यविष्णोःनामापिआवदतअन्येवदंतुमावा हेविष्णोवयं तेसुमतिंशोभनं महःभजामहेइतिश्रुते रभिप्रायः ॥ वेवेष्टि व्याप्नोतीति विष्णुःविषेर्व्याप्त्यभिधायिनोक्तुप्रत्ययांतस्यरूपंविष्णुरिति देशकालवस्तुपरिच्छे दशब्दशून्यइत्यर्थः।'व्याप्तामेरोदसीपार्थक्रांतिश्चाभ्यधिकास्थिता ॥क्रमणाच्चाप्यहंपार्थविष्णुरित्यभिसंज्ञित'इति महाभारते ॥ "यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थित"इत्यादिश्रुते र्बृहन्नारायणे ॥ सर्वभूतस्थमेकं नारायणं कारकरूपमेकाकारंपरंब्रह्मशोकमोहविनिर्मुक्तंविष्णुंध्यायन्नासीदतात्या त्मबोधोपनिषदि । विशतेर्वा क्तुप्रत्ययांतस्यरूपंविष्णुरिति"यस्माद्विश्वमिदंसर्वंतस्यशक्त्या महात्मनः । त स्मादेवोच्यते विष्णुर्विशेर्धातोःप्रवेशनात्"इतिविष्णुपुराणे । यदुद्देशेनवषट्क्रियासवषट्कारःयस्मिन्यज्ञेवावषट्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रियासवषट्कारः 'यज्ञोवैविष्णुः' इतिश्रुतेर्यज्ञोवषट्कारःवषट्कारादिमंत्रात्मनादेवान्प्रीणयतीतिवाप्रजापतिश्चवष
ट्कारश्चेतिश्रुतेःदेवतावा ।भूतंचभव्यंचभवच्चभूतभव्यभवंतितेषांप्रभुर्भूतभव्यभवत्प्रभुःकालभेदमनादृत्यसन्मात्रप्रति
यौगिकमैश्वर्यमस्येति प्रभुत्वं।रजोगुणंसमाश्रित्य विरिंचिरूपेणभूतानिकरोतीतिवाभूतकृत् । सत्वगुणमधिष्ठायभू
तानिबिभर्तिपालयतिधारयति पोषयतीतिवा भूतभृत् ।प्रपंचरूपेणभवतीति केवलं भवत्येवेति भावःभवनंभावःसत्ता
त्मकोवा ।भूतात्माभूतानामात्मांतर्यामीतिभूतात्मा 'एषतआत्मांतर्यामी" तिश्रुतेः।भूतानिभावयतिजनयतिवर्धयती
तिवा भूतभावनः । भूतकृदादिभिर्गुणतंत्रत्वंप्राप्तंप्रतिषिध्यते १४पूतात्मेतिपूतःआत्मायस्यसपूतात्माकर्मधारयोवा
"केवलोनिर्गुणश्चेतिश्रुतेः गुणोपरागःस्वेच्छातःपुरुषस्येतिकल्प्यते"१० परमश्चासावात्मा चेति परमात्मा कार्यका
रणविलक्षणोनित्यशुद्धमुक्तस्वभावः।मुक्तानांपरमाप्रकृष्टागतिर्गंतव्या देवतापुनरावृत्यसंभवात्तद्गतस्येति क्तानांमुप

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥ अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥१५

रमागतिः"मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यत" इतिभगवद्वचनं ।नव्येतिनास्यव्ययो विनाशोविकारोवाविद्यतइत्य
व्ययःअजरोमरइतिश्रुतेः।पुरंशरीरंतस्मिन्शेते ।पुरुषः"नवद्वारंपुरंपुण्यमेतैर्भावैःसमन्वितं।व्याप्यशेतेमहात्मायस्त
स्मात्पुरुषउच्यते" इतिमहाभारतेयद्वाअस्तेर्व्यस्ताक्षरयोगात्आसीत्पुरापूर्वमेवेतिविग्रहंकृत्वाव्युत्पादितःपुरुषः
"पूर्वमेवाहमिहासामितितत्पुरुषस्यपुरुषत्व" मितिश्रुतेःपुरुषुभूरिषुउत्कर्षशालिषुसत्वेषुसीदतीतिवापुरूणिसुवना
निसंहारसमयेअस्यतिअंतंकरोतिवापूर्णत्वापूरणाद्वासदनाद्वापुरुषः"पूरणात्सदनाच्चैवततोसौपुरुषोत्तम"इतिपंच
मवेदे।साक्षादव्यवधानेनपश्यतिसर्वमितिसाक्षी'साक्षाद्द्रष्टरिसंज्ञायामि'तिपाणिनिवचनादिन्प्रत्ययः । क्षेत्रंशरीरं
जानातीतिक्षेत्रज्ञः'आतोऽनुपसर्गेक'इतिकप्रत्ययः "क्षेत्रज्ञंचापिमांविद्धी"तिभगवद्वचनात्'क्षेत्राख्याभिशरीरा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णितेषांचैवयथासुखं।तानिवेत्तिसयोगात्मातत:क्षेत्रज्ञउच्यते"इतिब्रह्मपुराणेसएवानक्षरतीत्यक्षरःपरमात्माचअश्नातेरश्नोतेर्वा सरप्रत्ययांतस्यरूपमक्षर मिति स एवकारात् क्षेत्रज्ञाक्षरयोरभेदः"परमार्थतस्तत्त्वमस्ये"तिश्रुतेश्चकाराव्यावहारिकोभेदःप्रसिद्धेरपरमार्थत्वात् १५॥योगो"नानेंद्रियाणिसर्वाणिनिरुध्यमनसासह।एकत्वभावनायोगःक्षेत्रज्ञपरमात्मनोः"तदव्याप्यतयायोगःयोगंविचारयंतिजानंतिलभंतइतिवायोगविदस्तेषांनेतांज्ञानिनांयोगक्षेमवहनादिनेतियोगविदांनेता।प्रधानंप्रकृतिर्मायापुरुषोजीवस्तयोरीश्वरःप्रधानपुरुषेश्वरः२०नरस्यसिंहस्यचावयवायस्मिन्लक्ष्यंतेतद्वपुर्यस्य सनारसिंहवपुः । यस्यवक्षसिनित्यंवसतिश्रीःसश्रीमान् । अभिरूपाःकेशाःयस्यसकेशवः 'केशाद्वोऽन्यतरस्या'मिति वप्रत्ययःप्रशंसायांयद्वाकश्चअश्वईशश्चत्रिमूर्तयःकेशास्तेयद्वशेनवर्ततेसकेशवःके

योगो योगविदांनेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥१६॥
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥१७॥

शिवधाद्वा"यस्मात्त्वैवयषदुष्टात्माहतःकेशीजनार्दन । तस्मात्केशवनाम्ना त्वंलोकेगोपोभविष्यसी"तिविष्णुपुराणेश्रीकृष्णंप्रतिनारदवचनम्पृषोदरादित्वाच्छब्दसाधुत्वकल्पना । पुरुषाणामुत्तमःपुरुषोत्तमःअत्र'नानिर्धारण'इतिषष्ठीसमासप्रतिषेधोनभवतिजात्याद्यनपेक्षयाऽसमर्थत्वात्यत्रपुनर्जातिगुणक्रियापेक्षयापृथक्क्रियातत्रसमर्थत्वान्निषेधः प्रवर्ततेमनुष्याणांक्षत्रियःशूरतमःगवांकृष्णागौःसंपन्नक्षीरतमाअध्वगानांधावन्शीघ्रतमइतिअथवापंचमीसमासःतथाचभगवद्वचनं "यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः । अतोस्मि लोकेवेदेचप्रथितःपुरुषोत्तम"इति ॥ १६ ॥ 'असतश्चसतश्चैवसर्वस्यप्रभवाप्ययौ । सर्वस्यसर्वदाज्ञानात्सर्वमेनंप्रचक्षत' इतिभगवद्वच।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सवचनात्सर्वः । शृणातिसकलाःप्रजाःसंहरतिइतिशर्वः । निस्त्रैगुण्यतयाशुद्धत्वाच्छिवः"सब्रह्मसशिव"इतिअभे
दादेशाच्छिवादिनामभिर्हरिरेवस्तूयते । स्थिरत्वात्स्थाणुः ।भूतानामादिः कारणत्वादितिभूतादिः।प्रलयेस्मिन्स
र्वेनिधीयतइतिनिधिः 'कर्मण्यधिकरणेचे'तिकिप्रत्ययः सएवनिधिर्विशिष्यतेअव्ययअविनश्वरो निधिरित्यर्थः
॥ ३० ॥ स्वेच्छयासमीचीनंभवनमितिसंभवःसंभवामियुगेयुगइतिभगवद्वचनात्ततथादुष्टविनाशायसाधूनां र
क्षयासंभवाम्येवंगर्भदुःखविवर्जित इति । सर्वेषांभोक्तॄणांफलानिभावयतीतिभावनः " सर्वफलदातृत्वं फलमेत
दुपपत्तेः । इत्यत्रप्रतिपादितम् । प्रपंचस्याधिष्ठानत्वेनधारणाद्भर्ता । प्रकर्षेणमहाभूतानिअस्माज्जायंतइतिप्रभवः
प्रकृष्टोभवोजन्मास्येतिवा । सर्वासुक्रियासुसामर्थ्यातिशयात्प्रभुः । निरुपाधिकमैश्वर्यमस्येतिईश्वरः"एषसर्वे
श्वर"इतिश्रुतेः ॥ १७ ॥ स्वयमेवभवतीतिस्वयंभूः "सएवस्वयमुद्भवादि"तिमानवंवचनंएषायदुपरिभवतिस्वयं

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ॥ अनादिनिधनो धाता विधाता धातुरुत्तमः १८

भवतीतिवास्वयंभूः "परिभूःस्वयंभूरिति"मंत्रवर्णात् । शंसुखंभक्तानांभावयतीतिशंभुः। आदित्यमंडलांतस्थोहि
रण्मयःपुरुषःआदित्यःद्वादशादित्येषुविष्णुर्वा"आदित्यानामहंविष्णु"रित्युक्तेः अदितेरखंडितायामह्याअयंपति
रितिवा "इयंवाअदितिःमहींदेवींविष्णुपत्नीमिति" श्रुतेःयथादित्यएकएवानेकेषुजलभाजनेषुअनेकवत्प्रतिभास
तेएवमनेकेषुशरीरेषुएकएवात्माऽनेकवत्प्रतिभासतइतिआदित्यसाधर्म्याद्वाआदित्यः । पुष्करेणोपमितेअक्षिणी
यस्येतिपुष्कराक्षः ॥ ४० ॥ महानूर्जितःस्वनोनादोवाश्रुतिलक्षणोयस्येतिमहास्वनः "सन्महदि"त्यादिनास
मासेकृते "आन्महतःसमानाधिकरणजातीययोरि"त्यात्वं अस्यमहतोभूतस्यनिश्वसितमेतदृग्वेदोयजुर्वेद"इति
श्रुतेः । आदिर्जन्मनिधनंविनाशःतद्द्वयंयस्यनविद्यतेसोऽनादिनिधनः।अनंतादिरूपेणविश्वंबिभर्तीतिधाताकर्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णांतत्फलानांचकर्ता । विधाताअनंतादीनामपिधारकत्वाद्विशेषेणदधातीतिवा । धातुरुत्तमइतिनामैकंसविशे
षणंसामानाधिकरण्येनसर्वधातुभ्यः पृथिव्यादिभ्यउत्कृष्टश्चिद्धातुरित्यर्थः धातुर्विरिंचेरुत्कृष्टइतिवानामद्वयं
वाकार्यकारणप्रपंचधारणाच्चिदेवधातुरुक्तः सर्वेषामुत्कृष्टानामतिशयेनोद्भवत्वादुत्तमः ॥ १८ ॥ शब्दादिरहि
तत्वान्नप्रत्यक्षगम्यः नाप्यनुमानविषयः तद्व्याप्तलिंगाभावात् । नाप्युपमानसिद्धोनिर्धर्मत्वेनसादृश्याभावा
त् नाप्यर्थापत्तिग्राह्यःतद्विनानुपपद्यमानत्वासंभवात् । नाप्यभावगोचरोभावत्वेनसंमतात् । अभावसाक्षित्वाच्च
नषष्ठप्रमाणस्य । नापिशास्त्रप्रमाणवेद्यःप्रमाणजन्यातिशयाभावात् । यद्येवंशास्त्रयोनित्वंकथमुच्यतेप्रमाणा
दिसाक्षित्वेनप्रकाशस्वरूपस्यप्रमाणाविषयत्वेअध्यस्तात्तद्रूपत्वेनशास्त्रप्रमाणत्वमित्यप्रमेयः । साक्षित्वाद्धृषीका
णींद्रियाणितेषामीशःक्षेत्रज्ञरूपभाक्यद्वेंद्रियाणियस्यवशेवर्ततेसपरमात्मा । यस्यवासूर्यरूपस्यजगत्प्रीतिकरा

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरोध्रुवः ॥ १९ ॥

हृष्टाःकेशारश्मयःसहृषीकेशःपृषोदरादित्वं।तथोक्तंमोक्षधर्मे"सूर्याचंद्रमसोःशश्वदंशुभिःकेशसंज्ञितैः।बोधयन्स्वा
पयंश्चैवजगदुत्तिष्ठतेपृथक्।बोधनात्स्वापनाच्चैवजगतोहर्षणंभवेत् । अग्निष्टोमकृतैरेवकर्मभिःपांडुनंदन । हृषीकेशो
महीशानोवरदोलोकभावन"इति । जगत्कारणंपद्मंनाभौयस्येतिपद्मनाभःअजस्यनाभावध्येकमर्पितमि"तिश्रु
तेः। पृषोदरादित्वात्साधुत्वं।अमराणांप्रभुरमरप्रभुः।विश्वंकर्मक्रियाक्रियतइतिजगत्कर्मविश्वंकर्मयस्याविश्वकर्मा ।
विचित्रनिर्माणशक्तिमत्वाद्विश्वकर्मात्वष्टातत्सादृश्याद्वा॥ ५० ॥ मननान्मनुः। "नान्योतोस्तिमंते"तिश्रुतेःमंत्रो
वाप्रजापतिर्वा। संहारसमयेसर्वभूततनूकरणत्वात्त्वष्टा त्वक्षतेस्तनूकरणत्वार्थेतृच्प्रत्ययः । अतिशयेनस्थूलःस्थ
विष्ठः । पुराणःस्थविरःएकंह्यस्यस्थविरस्यनामे"तिश्रुतेः वयोवचनोवा स्थिरत्वाद्ध्रुवःस्थविरोध्रुवइत्येकमिदंनाम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सविशेषणम् ॥ १९ ॥ कर्मेंद्रियैर्नगृह्यतेइत्यग्राह्यइत्यर्थः "यतोवाचोनिवर्ततेअप्राप्यमनसासहेति" श्रुतेः। शश्वत् सर्वेषुकालेषुभवतीतिशाश्वतः "शाश्वतंशिवमच्युतम्" इतिश्रुतेः। "कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः। विष्णुस्तद्भावयोगाच्चकृष्णोभवतिशाश्वत" इतिव्यासवचनात्सच्चिदानंदात्मकःकृष्णः। "कृषामिपृथिवींपार्थभूत्वा कार्ष्णायसो हलः। कृष्णोवर्णश्चमेयस्मात्तस्मात्कृष्णोहमर्जुने" ति "महाभारते। लोहितेअक्षिणीयस्येतिलोहिताक्षः "असावृषभोलोहिताक्ष" इतिश्रुतेः। प्रलयेभूतानितर्दयतीतिप्रतर्दनः। ज्ञानैश्वर्यादिसंपन्नःप्रभूतः ॥ ६० ॥ ऊर्ध्वाधोमध्यभेदेनतिसृणांककुभामपिधामेतित्रिककुब्धामेत्येकमिदंनाम। येनपुनातियोवापुनातिऋषिर्देवतावा तत्पवित्रम्। "पुवःसंज्ञायां" "कर्तरिचर्षिदेवतयोरिति" भगवत्पाणिनिस्मरणात्इत्रप्रत्ययः। "अशुभानिनिरा

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुब्धाम पवित्रं मंगलंपरम् ॥ २० ॥
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भोभूगर्भो माधवो मधुसूदनः ॥ २१ ॥

चष्टेतनोतिशुभसंततिं स्मृतिमात्रेणयत्पुंसांब्रह्मतन्मंगलंविदुरि" तिश्रीविष्णुपुराणवचनात्कल्याणरूपत्वान्मंगलं सर्वभूतेभ्यःउत्कर्षतरंमंगलमित्येकमिदंनामसविशेषणम् ॥ २० ॥ सर्वभूतानियंतृत्वादीशानः प्राणान्ददातिचेष्टयतीतिवाप्राणदः "कोह्येवान्यात्कःप्राण्यादि" तिश्रुतेः यद्वाप्राणान्कालात्मनाद्यतिखंडयतीतिवाप्राणदः प्राणान्दापयतिशोधयतीतिददातिलुनातीतिवाप्राणदः। प्राणितीतिप्राणःक्षेत्रज्ञःपरमात्मावा। "प्राणस्यप्राणमि" तिश्रुतेर्मुख्यप्राणोवा। वृद्धतमोज्येष्ठः "ज्यचे" त्यधिकारे "वृद्धस्यचे" तिवृद्धशब्दस्यज्यादेशविधानात्। प्रशस्यतमःश्रेष्ठः 'प्रशस्यस्यश्रः' इतिश्रादेशविधानात्। "प्राणोवाज्येष्ठश्चश्रेष्ठश्चे" तिश्रुतेः। मुख्यप्राणोवाज्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्ठश्चेत्यधिकरणसिद्धत्वात् । सर्वकारणत्वाद्वा ज्येष्ठः । श्रेष्ठः सर्वातिशयत्वाद्वा श्रेष्ठः । ईश्वरत्वेन सर्वासां प्रजानां पतिःप्रजापतिः । हिरण्मयांडांतर्वर्तित्वाद्धिरण्यगर्भः विरिंच्यात्मनावाहिरण्यगर्भः"हिरण्यगर्भःसमवर्तताग्र" इतिश्रुतेः ॥ ७० ॥ भूर्गर्भोयस्यसः भूगर्भः । मायाः श्रियःधवः पतिः माधवः । मधुविद्याच्च माधवः बोध्यत्वाद्वा । "मौनाद्ध्यानाच्च योगाच्चविद्धिभारत माधवमि" ति व्यासवचनाद्वा माधवः । मधुनामानमसुरंसूदितत्वात्इतिमधुसूदनः । "कर्णमिश्रोद्भवंचापिमधुंनाममहासुरम् । ब्रह्मणोऽप चितंकुर्वन्जघानपुरुषोत्तमः । तस्यतातवधादेवदेवदानवमानवाः । मधूसुदनइत्याहुर्ऋषयश्चजनार्दनमि"ति महाभारते ॥ २१ ॥ सर्वशक्तिमत्तयाईश्वरः । विक्रमःशौर्यतद्योगाद्विक्रमी । धनुरस्यास्तीतिधन्वी व्रीह्या

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥२२॥

दित्वादिनिप्रत्ययः "रामः शस्त्रभृतामहमि"ति भगवद्वचनात् । मेधा बहुग्रंथधारणसामर्थ्यं सायस्यास्तीति मेधावी । अस्मायामेधास्रजोविनि"रितिपाणिवचनाद्विनिप्रत्ययः सलोपश्च । विचक्रमेजगद्विश्वंतेनविक्रमः । विनागरुडेनपक्षिणाक्रमणाद्वाविक्रमः। "क्रमणात् क्रमहेतुत्वाद्वाक्रमो विष्णुरि"ति मनुवचनात् । अविद्यमान उत्तमो यस्मात्सोनुत्तमः । "यस्मात्परं नापरमस्ति किंचिदि"ति श्रुतेः "न त्वत्समोस्त्यभ्यधिकः कुतोन्य"इतिस्मृतेश्च ॥८० ॥दैत्यादिभिर्धर्षयितुं न शक्यत इति दुराधर्षः । प्राणिनां पुण्यापुण्यात्मकं कर्म कृतं जानातीतिः कृतज्ञः पत्रपुष्पाद्यल्पमपि प्रयच्छतां मोक्षं ददातीति वा कृतज्ञः । पुरुषप्रयत्नः कृतिः क्रिया वा हिंसा वा सर्वात्मकत्वात्तदाधारतया लक्ष्यतइति वा कृतिः कृतेति वा कृतिः । स्वमहिम्निप्रतिष्ठितत्वादात्मवान् "स भगवतः कस्मिन्प्रतिष्ठितइति स्वे महिम्नी"तिश्रुतेः ॥ २२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुराणां देवानां शोभनदातॄणां वा ईशः सुरेशः। आर्तानामार्तिहरणत्वाच्छरणम्। परमानंदरूपत्वाच्छर्म। विश्वस्य कारणत्वाद्विश्वरेताः। सर्वाःप्रजायत्सकाशादुद्भवंतीतिसप्रजाभवः। प्रकाशरूपत्वादहः॥ ९०॥ कालात्मनास्थितोविष्णुःसंवत्सरइत्युक्तः। व्यालवद्गृहीतुमशक्यत्वाद्व्यालः। प्रतीतिःप्रज्ञातद्रूपत्वात्प्रत्ययः "प्रज्ञानंब्रह्मे"तिश्रुतेः। सर्वाणिदर्शनानिप्रत्यक्षाणियस्यससर्वदर्शनः सर्वात्मकत्वात् विश्वतश्चक्षुर्विश्वाक्षमितिश्रुतेः॥ ॥ २३॥ नजायतइत्यजः। "नजातोनजनिष्यत"इतिश्रुतेः। "नहिजातोनजायेहंनजनिष्येकदाचन। क्षेत्रज्ञः सर्वभूतनांतस्मादहमजःस्मृत"इतिमहाभारते। सर्वेषामीश्वराणामपीश्वरत्वात्सर्वेश्वरः"एषसर्वेश्वर"इतिश्रुतेः नित्यनिष्पन्नरूपत्वासिद्धः। सर्ववस्तुषुसंविद्रूपत्वान्निरतिशयत्वात्फलरूपत्वासिद्धिः। स्वर्गादीनांविनाशित्वा

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः॥ २३॥
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः॥ वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः॥ २४॥

दफलत्वम्। सर्वभूतानामादिकारणत्वात्सर्वादिः। स्वरूपसामर्थ्यान्नच्युतोनच्यवतेनचव्यवशिष्यतेइत्यच्युतः। "शाश्वतंशिवमच्युतमि"तिश्रुतेः तथाचभगवद्वचनम् "यस्मान्नच्युतःपूर्वोहमच्युतस्तेनकर्मणे"ति॥ इतिनाम्नां शतमाद्यंविवृतम्॥१००॥विश्वं। परमात्मा। नारसिंहवपुःसंभवो। महास्वनो। मनुस्त्रिककुब्धाम। भूगर्भो। दुराधर्षः संवत्सरः॥ वर्षणात्सर्वकामानांधर्मोवृषःकात्ततोयात् भूमिमपादिति कपिर्वराहःवृषरूपत्वात्कपिरूपत्वाच्च वृषाकपिः'कपिर्वराहः श्रेष्ठश्च धर्मश्चवृष उच्यते। तस्माद्वृषाकपिंप्राहकश्यपोमांप्रजापति'रितिव्यासवचनं। इयानितिमातुंपरिच्छेत्तुंनशक्यतआत्मस्येत्यमेयात्मा। "सर्वसंबंधविनिर्गतःसर्वयोगविनिःसृतः। असंगोह्ययंपुरुष"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इतिश्रुतेः । नानाशास्त्रोक्ताद्योगादवगतत्वाद्वासर्वयोगविनिःसृतः ॥ २४ ॥ वसंतिसर्वभूतान्यत्रतेष्वयमपिवसतीति वसुः "वसूनामस्मिपावक'इत्युक्तोवावसुः । वसुशब्देनधनवाचिनाप्राशस्त्यंलक्ष्यते । प्रशस्तंचमनोयस्यसवसु मनाः । रागद्वेषादिभिःक्लेशैर्महदादिभिः उपक्लेशैश्चयतोऽकलुषितंततस्तन्मनः प्रशस्तम् । अवितथरूपत्वात्पर मात्मासत्यः"सत्यंज्ञानमनंतंब्रह्मेति"श्रुतेः । मूर्तामूर्तात्मकत्वाद्वा"सच्चत्यच्चाभवदि"तिश्रुतेः । सदितिप्राणास्ति त्यन्नयमितिदिवाकरस्तेनप्राणान्नादित्यरूपत्वाद्वासदितिप्राणस्तीत्यन्नैयमित्यसावादित्यइतिश्रुतेः । सत्यःस त्सुसाधुद्वात्वासत्यः । समआत्मामनोयस्यरागद्वेषादिभिरदूषितःससमात्मा । सर्वभूतेषुसमएकआत्मावासमा त्मा"समआत्मेतिविद्यादि"तिश्रुतेः । सर्वैरप्यर्थजातैःपरिच्छिन्नोमितःसंमितःसर्वैरपरिच्छिन्नोऽमितइत्यसंमितो

वसुर्वसुमनाःसत्यःसमात्मासंमितःसमः ॥ अमोघःपुंडरीकाक्षोवृषकर्मा वृषाकृतिः ॥ २५ ॥

रुद्रोबहुशिराबभ्रुर्विश्वयोनिःशुचिश्रवाः ॥ अमृतःशाश्वतःस्थाणुर्वरारोहो महातपाः॥ २६ ॥

वा । सर्वकालेषुसर्वविकाररहितत्वात्समः मयालक्ष्म्यासहवर्तइतिवासमः । पूजितःस्तुतःसंस्मृतोवासर्व फलंददातिनवृथाकरोतीत्यमोघः । अवितथसंकल्पाद्वासत्यसंकल्पइतिश्रुतेः ॥ ११० ॥ हृदयस्थंपुं डरीकमश्नुतेव्याप्नोतितत्रोपलक्षितइतिपुंडरीकाक्षः"यत्पुंडरीकंपुरमध्यसंस्थमि'तिश्रुतेः । पुंडरीकाकारेउभे अक्षिणीअस्येतिवाधर्मलक्षणंकर्मयस्येति वृषकर्मा । धर्मार्थमाकृतिःशरीरंयस्येतिसवृषाकृतिः धर्मसंस्थापना र्थायसंभवामियुगेयुग'इतिभवद्वचनात् ॥ २५ ॥ संहारकालेप्रजाःसंहरन्रोदयतीति रुद्रःरुतं रातिददातीति वारुद्रःरुद्रुःखंकारणंवाद्रावयतीतिवारुद्रः । रोदनाद्द्रावणाद्वापिरुद्रइत्युच्यतेतस्माच्छिवःपरमकारणमि'ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिंगपुराणवचनात् । बहूनि शिरांसियस्येतिबहुशिराः । "सहस्रशीर्षे"तिश्रुतेः । बिभर्तिलोकानिति बभ्रुः । विश्वस्यकारणत्वाद्विश्वयोनिः । शुचीनि श्रेयांसिनामानि श्रवणीयान्यस्येति शुचिश्रवाः । नविद्यतेमृतंमरणमस्येति अमृतः"अजरोऽमरइतिश्रुतेः । शाश्वतश्चासौस्थाणुश्चेतिशाश्वतस्थाणुः ॥ १२० ॥ वरआरोहोंऽकोस्येति वरारोहः वरमारोहणंयस्मिन्नितिवा । आरूढानांपुनरावृत्त्यसंभवात्"नसपुनरावतत"इतिश्रुतेः । "यं प्राप्यननिवर्तंतेतद्धामपरमंममेतिभगवद्वचनात् । महत्सृज्यविषयंतपोज्ञानमस्येतिमहातपाःयस्यज्ञानमयंतपइतिमंत्रवर्णात् ऐश्वर्यप्रतापोवातपोमहदस्येतिवामहातपाः॥२६॥ सर्वत्रगच्छतीति सर्वगः । कारणत्वेनव्याप्तत्वात् सर्वत्रसर्ववेत्तिविंदतीति वासर्ववित् । भातीतिभानुः । तमेवभांतमनुभातिसर्व'मितिश्रुतेः "यदादित्यगतंतेजोजगद्भासयतेखिलमितिस्मृतेश्च सर्वविच्चासौभानुश्च सर्वविद्भानुः । विष्णुअव्ययंसर्वइत्यर्थंविष्वगंचतेपलायंते दै

सर्वगःसर्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥ वेदो वेदविदव्यंगोवेदांगोवेदवित्कविः ॥ २७ ॥

त्यसेनायस्यरणोद्योगमात्रेणेति विष्वक्सेनः । जनान् अर्दयति हिनस्तिनरकादीन् गमयतीति वाजनैः पुरुषार्थमभ्युदयनिः श्रेयसलक्षणं चोच्यते इति जनार्दनः । वेदरूपत्वाद्वेदः वेदयतीतिवावेदः । "तेषामेवानुकंपार्थमहज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेनभास्वते'तिभगवद्वचनात् यथावद्वेदंवेदार्थंचविंदतइतिवावेदवित्वेदांतकृद्वेदविदेवचाहमितिभगवद्वचनात् । 'सर्वे वेदाः सर्ववेद्याः सशास्त्राः सर्वेयज्ञाः सर्वईज्यश्चकृष्णः विदुः कृष्णं ब्राह्मणास्तत्त्वतोये तेषांराजन्सर्वयज्ञाःसमाप्ता'इतिमहाभारते । अव्यंगज्ञानादिभिः परिपूर्णोऽविकलइत्युच्यतेव्यंगोव्यक्तितिर्नविद्यत इत्यव्यंगोवा ।"अव्यक्तोयमि"ति भगवद्वचनात् । वेदा अंगभूता यस्य स वेदांगः ॥ १३० ॥ वेदान् विचारयतीति वेदवित् । कविः कांतदर्शीसर्वदृक् । "नान्यदतोस्तिदृष्टे"त्यादिश्रुतेः । "क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विर्मनीषी'ति मंत्रवर्णात् ॥ २७ ॥ लोकानध्यक्षयतीति लोकाध्यक्षः । सर्वेषांलोकानांप्रधान्येनोपद्रष्टा । लोकपालादिसुराणामध्यक्षःसुराध्यक्षःधर्माधर्मौ साक्षादीक्षतेऽनुरूपं फलं दातुं तस्माद्धर्माध्यक्षः । कृतश्चकार्यरूपेण अकृतश्च कारणरूपेणेति कृताकृतः । सर्गादिषुपृथग्विभूतयश्चतस्रःआत्मनोमूर्तयोयस्यसचतुरात्मा । "ब्रह्मा दक्षादयः कालस्तथैवाखिलजंतवः । विभूतयो हरेरेताजगतःसृष्टिहेतवः । विष्णुर्मन्वादयः कालः सर्वभूतानि चद्विज । स्थितेर्निमित्तभूतस्यविष्णोरेता विभूतयः । रुद्रःकालोंतकाद्याश्च समस्ताश्चैव जंतवः। चतुर्धा प्रलयायैताजनार्दनविभूतय"इति वैष्णवपुराणे । "व्यूह्यात्मानंचतुर्धावैवासुदेवादिमूर्तिभिः । सृष्ट्यादीन्प्रकरोत्येष विश्रुतात्माजनार्दन"इति व्यासवचनात् चतुर्व्यूहः । दंष्ट्राश्चतस्रोयस्येति चतुर्दंष्ट्रोनृसिंहविग्रहः । यद्वा साद

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः॥चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥२८॥
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः॥अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ २९

श्याच्छृंगंदंष्ट्रेत्युच्यते । 'चत्वारिशृंगे'ति श्रुतेः । चत्वारोभुजाअस्येतिचतुर्भुजः ॥ ४० ॥ २८ ॥ प्रकाशैकरसत्वाद्भ्राजिष्णुः । भोज्यरूपतया प्रकृतिर्माया भोजन मुच्यते । पुरुषरूपेणतां भुनक्तीति भोक्ता । हिरण्याक्षादीन् सहते अभिभवतीति सहिष्णुः । हिरण्यगर्भरूपेण जगदादावुत्पद्यतेस्वयमिति जगदादिजः ।अघं नविद्यतेस्येत्यनघः । "अपहतपाप्मे"तिश्रुतेः । विजयतेज्ञानवैराग्यैश्वर्यादिभिर्गुणैर्विश्वमिति विजयः । यतोजयत्यतिशयेनसर्वभूतानिस्वभावतोतोजेता । विश्वंयोनिर्यस्यविश्वश्चासौयोनिश्चेतिवा विश्वयोनिः । पुनःपुनःशरीरेषूवसतिक्षेत्रज्ञरूपेणेतिपुनर्वसुः ॥ ५० ॥ २९ ॥

३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इंद्रमुपगतोऽनुजत्वेनेत्युपेंद्रः।यद्वा उपरिइंद्रःउपेंद्रः। "ममोपरियथेंद्रस्त्वंस्थापितोगोभिरीश्वरः। उपेंद्रइति कृष्णा त्वांगास्यंतिभुवि देवता'इतिहरिवंशवचनात्। बलिं वामनरूपेण याचितवानितिवामनः। संभजनीय इतिवा। वामनः "मध्येवामनमासीनंविश्वेदेवा उपासत"इतिमंत्रवर्णात्। सएवजगत्त्रयं क्रममाणःप्रांशुरभूदितिप्रांशुः। 'तोयेतुपतितेहस्तेवामनोभूदवामनः। सर्वदेवमयंरूपंदर्शयामासवै प्रभुः। भूःपादौद्यौःशिरश्चास्यचंद्रादित्यौ चचक्षुषी। इत्यादिविश्वरूपंदर्शयित्वा तस्यविक्रमतो भूमिंचंद्रादित्यौ स्तनांतरे। नभःप्रक्रममाणस्यनाभ्यां तौसमवस्थितौ। दिवमाक्रममाणस्य जानुमूलेव्यवस्थितौ'इति प्रांशुत्वंदर्शयति हरिवंशे। नमोघं चेष्टितंय स्यसोऽमोघः। स्मरतांस्तुवतामर्चयतांपावनत्वाच्छुचिः।'अस्यस्पर्शश्चमहान्शुचि'रिति मंत्रवर्णात्। बलप्रकर्ष

उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः॥ अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥३०॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधु॥अतींद्रियो महामायो महोत्साहो महाबलः॥३१॥

शालित्वादूर्जितः। अतीत्येंद्रं स्थितोज्ञानैश्वर्यादिभिःस्वभावसिद्धैरित्यतींद्रः। सर्वेषांप्रतिसंहृतौप्रतिसंग्रहात्सं ग्रहः। सृज्यरूपतयासर्गहेतुत्वाद्वासर्गः। एकरूप्येणजन्मादिरहिततयाधृतआत्मा येनसधृतात्मा॥ ६०॥ स्वेषुस्वेष्वधिकारेषुप्रजानियमयतीतिनियमः। अंतर्यमयतीतियमः॥ ३०॥ निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वे द्यः। सर्वविद्यानांवेदितृत्वाद्वैद्यः। सदाआविर्भूतस्वरूपत्वात्सदायोगी। धर्मत्राणायवीरान्असुरभटान्हंतीतिवी रहा। मायाविद्यायाःपतिर्माधवः। "माविद्याचहरेःप्रोक्तातस्याईशोयतोभवान्। तस्मान्माधवनामासिधवः स्वामीतिशब्दित"इतिहरिवंशे यथामधुपरांप्रीतिमुत्पादयतिअयमपितथेतिमधुः। शब्दादिरहितत्वादिंद्रिया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णामविषयइत्यतींद्रियः । "अशब्दमस्पर्शमिति"श्रुतिः । मायाविनापिमायाकारित्वान्महामायः"ममायादुर त्ययेति"भगवद्वचनात् ॥ ७० ॥ जगदुत्पत्तिस्थितिलयार्थमुद्युक्तत्वान्महोत्साहः । बलिनामपिबलवत्वान्महाब लः ॥ ३१ ॥ बुद्धिमतामपिबुद्धिमत्त्वान्महाबुद्धिः । महदुत्पत्तिकारणमविद्यालक्षणवीर्यमस्येतिमहावीर्यः । महतीशक्तिःसामर्थ्यमस्येतिमहाशक्तिः । महतीद्युतिर्बाह्याभ्यंतरावास्येतिमहाद्युतिः। 'स्वयंज्योतिश्चे'तिश्रुतेः। "ज्योतिषांज्योति"रित्यादेश्च ।इदंतदितिनिर्देष्टुंयन्नशक्यतेपरस्मैअसंवेद्यत्वात्तदनिर्देश्यंवपुरस्येतिअनिर्देश्यव पुः। ऐश्वर्यलक्षणासमग्राश्रीर्यस्यसश्रीमान्।सर्वैःप्राणिभिरमेयाबुद्धिरात्मायस्यसोमेयात्मा।महांतमद्रिंगिरिंमंद रंगोवर्द्धनंचअमृतमथनेगोरक्षणेचधृतवानितिमहाद्रिधृक्षांतोयम् ॥ ८० ॥ ३२ ॥ महानिष्वासइषुक्षेपोयस्य

महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुःश्रीमानमेयात्मा महाद्रिधृक् ॥ ३२ ॥
महेष्वासो महीभर्ता श्रीनिवासः सतांगतिः॥ अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः॥३३॥

समहेष्वासः । एकार्णवांप्लुतांमहींचबभारेतिमहीभर्ता । यस्यवक्षस्यनपायिनीश्रीर्वसतिसश्रीनिवासः । सतांवैदि कानांसाधूनांपुरुषार्थसाधनहेतुःप्राप्तिहेतुःसतांगतिः । नकेनापिप्रादुर्भावेषुनिरुद्धइत्यनिरुद्धः । सुरान्आनंद यतीतिसुरानंदः । 'नेष्टांवैधरणींपूर्वमविदंयद्वहागताम् । गोविंदइतितेनाहंदेवैर्वारिभरभिष्टु'तइतिमोक्षधर्मवच नाद्गोविंदः ॥ "अहंकिलेंद्रो देवानांत्वं गवामिंद्रतांगतः । गोविंदइतिलोकास्त्वांस्तोष्यंतिभुविशाश्वतमि"ति । "गौरेषाभवतोवाणी तांचविंदयते भवान् । गोविंदस्तुततोदेव मुनिभिःकथ्यतेभवान्"इतिचहरिवंशे । गौर्वा णीतांविंदंतीतिगोविदः तेषांपतिर्विशेषेणेति गोविदांपतिः ॥ ३३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेजस्विनामपि तेजस्वित्वान्मरीचिः । तेजस्तेजस्विनामहमितिभगवद्वचनात्स्वाधिकारात्प्रमाद्यंतीःप्रजादम यितुंशीलमस्यवैवस्वतादिरूपेणेतिदमनः ॥ ९० ॥ अहंसइतितादात्म्यभावितःसंसारभयंहंतीतिहंसः । पृषो दरादित्वाच्छब्दसाधुत्वम् । हंतिगच्छतिसर्वशरीरेष्वितिवा हंसः "हंसःशुचिष,,दि"तिमंत्रवर्णात् । शोभनधर्मा धर्मरूपपर्णत्वात्सुपर्णः।"द्वासुपर्णे"तिमंत्रवर्णात् । शोभनंपर्णयस्येतिवासुपर्णः"सुपर्णःपतताम्स्मि"इतिईश्वरवच नात्।भुजनगच्छतामुत्तमोभुजगोत्तमः । हिरण्यमेवकल्याणानाभिरस्येतिरमणीयनाभित्वात् हिरण्मयत्वाद्वाहिर ण्यनाभः । बदरिकाश्रमेनरनारायणरूपेणशोभनंतपश्चरतीति सुतपाः ।"मनसश्चेंद्रियाणांचह्यैकाग्र्यंपरमं तप" इतिस्मृतेः । पद्ममिवसुवर्तुलानाभिरस्येतिहृदयपद्मस्यनाभौमध्ये प्रकाशनाद्वापद्मनाभः । पृषोदरादित्वात्सा

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः॥ हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥३४॥अमृ त्युः सर्वदृक् सिंहः संधाता संधिमान् स्थिरः ॥ अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ३५

धुत्वकल्पना । प्रजानां पतिः पिताप्रजापतिः॥ ३४ ॥ मृत्युर्विनाशस्तद्धेतुर्वास्य नविद्यतेइत्यमृत्युः प्राणिनांकृता कृतं सर्वंपश्यतिस्वाभाविकेन बोधेनेतिसर्वदृक् । हिनस्तीतिसिंहः पृषोदरादित्वात्साधुत्वम् ॥ २०० ॥ ॥ इति नाम्नांद्वितीयंशतं विवृतम्। वृषाकपिः पुंडरीकाक्षो वरारोहो वेदविद्भाजिष्णुरुपेंद्रो नियमो महोत्साहोमहेष्वासो हंसः ॥ ॥ कर्मफलैःपुरुषान्संधत्तइति संधाता । फलभोक्ता च स एवेतिसंधिमान् । सदैकरूपत्वात्स्थि रः । अजति गच्छति क्षिपति इति वा अजः । मर्षितंसोढुं दानवादिभिर्न शक्यते इतिदुर्मर्षणः । श्रुतिस्मृत्या दिभिः सर्वेषामनुशिष्टिं करोतीतिशास्ता । विशेषेणश्रुतोयेनसत्यज्ञानादिलक्षणःआत्माऽतो विश्रुतात्मा । सुर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रीणां निहंतृत्वात्सुरारिहा ॥ ३५ ॥ सर्वविद्यानामुपदेष्टृत्वात्सर्वेषां जनकत्वाद्वा गुरुः । विरिंच्यादीनामपि ब्रह्मविद्यासंप्रदायकत्वाद्गुरुतमः । "योब्रह्माणंविदधातिपूर्वमि"ति मंत्रवर्णात् ॥ २१० ॥ धाम ज्योतिः "नारायणः परो ज्योतिरि"ति मंत्रवर्णात् । सर्वकामानामास्पदत्वाद्वा धाम"परं ब्रह्मपरं धामे"ति श्रुतेः । सत्यवचनलक्षणधर्मरूपत्वात्सत्यः'तमात् सत्यं परमंवदंती"तिश्रुतेः । सत्यस्य सत्यमितिवासत्यः । "प्राणा वैसत्यंतेषामेवसत्यमि"तिश्रुतेः । सत्यःअवितथःपराक्रमोयस्यससत्यपराक्रमः । निमीलितेयतोनेत्रेयोगानिद्रयातोनिमिषः । नित्यप्रबुद्धस्वरूपत्वादनिमिषःमत्स्यरूपतयावाआत्मरूपतयावाअनिमिषः ।भूततन्मात्ररूपांवैजयंत्याख्यांस्रजंनित्यं बिभर्तीति स्रग्वी । वाचोविद्यायाः पतिर्वाचस्पतिः सर्वार्थविषयाधीर्बुद्धिरस्येत्युदार

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनिमिषःस्रग्वी वाचस्पतिरुदारधीः ॥ ३६ ॥ अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ॥ सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ ३७ ॥ आवर्तनो निवृत्तात्मा संवृत्तः संप्रमर्दनः ॥ अहःसंवर्तको वह्निरनिलो धरणीधरः ३८

धीरितिपदद्वयमेकं नाम ॥ ३६ ॥ अग्रंप्रकृष्टंपदंनयतिमुमुक्षुमित्यग्रणीः । भूतग्रामस्यनेतृत्वाद्ग्रामणीः । श्रीः कांतिःसर्वातिशायिन्यस्येति श्रीमान् ॥ २२० ॥ प्रमाणानुग्राहकोभेदकरस्तर्को न्यायः । जगद्यंत्रनिर्वाहको नेता । श्वसनरूपेण भूतानि चेष्टयतीति समीरणः । सहस्राणि मूर्धानोस्येति सहस्रमूर्धा।विश्वस्यात्मा विश्वात्मा। सहस्राण्यक्षीण्यक्षाणिवा यस्य स सहस्राक्षः । सहस्राणि पादा अस्येति सहस्रपात् । "सहस्रशीर्षा पुरुषःसहस्राक्षः सहस्रपा"दितिश्रुतेः ॥ ३७ ॥ आवर्तयितुं संसारचक्रं शीलमस्येत्यावर्तनः । संसारबंधान्निवृत्त आत्मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वरूपमस्येति निवृत्तात्मा । आच्छादिकया अविद्यया संवृतत्वात्संवृतः ॥ २३० ॥ सम्यक् प्रमर्दयतीति रुद्रकालाद्याभिर्विभूतिभिरितिसंप्रमर्दनः । सम्यगह्नांप्रवर्तमानात्सूर्यादहःसंवर्तकः । महाप्रलयरूपःहविवहनाद्वह्निः । अनादानादनिलः।अननाद्वाअनिलः । शेषदिग्गजादिरूपेण वराहरूपेणवाधत्त इति धरणीधरः॥ ३८ ॥ शोभनः प्रसादो यस्यापकारवतामपिशिशुपालादीनां मोक्षप्रदातृत्वादिति सुप्रसादः । रजस्तमोभ्यामकलुषितआत्मांतःकरणमस्येतिप्रसन्नात्मा । करुणार्द्रस्वभावत्वाद्वायद्वाप्रसन्नस्वभावः कारुणिकइत्यर्थः । अवाप्तसर्वकामत्वाद्वा विश्वंधृतवानितिविश्वधृक् । त्रिधृषाप्रागल्भ्ये।विश्वंभुंक्ते भुनक्ति पालयतीतिवाविश्वभुक्॥ २४० ॥ हिरण्यगर्भादिरूपेणविविधंभवतीतिविभुः"नित्यं विभुमि"तिमंत्रवर्णात् । सत्करोति पूजयतीति सत्कर्ता । पू

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः॥सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः॥३९ ॥

जितैररपि पूजितः सत्कृतः । न्यायप्रवृत्ततयासाधुः ।साधयति साध्यभेदानुपादानात् साध्यमात्रसाधको वा जनान् संहारसमये अपह्नुतेः अपनयतीति जह्नुःजहात्यविदुषो भक्तान्नति परंपदमिति वा । नर आत्माततो जातान्याकाशादीनिनाराणि कार्याणितानिकारणात्मनाव्याप्नोतीत्यतश्चतान्ययनमस्येतिनारायणः"यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा । अंतर्बहिश्चतत्सर्वंव्याप्यानारायणः स्थित'इतिमंत्रवर्णात् । 'नराज्जातानितत्त्वानि नाराणीतिततोविदुः । तान्येवचायनं तस्यतेननारायणःस्मृत' · इतिमहाभारते । नाराणांजीवानामयनत्वात्प्रलयइतिवानारायणः"यत्प्रयंत्यभिसंविशंती"तिश्रुतेः"नाराणामयंनयस्मात्तस्मान्नारायणःस्मृत" इतिब्रह्मवैवर्तात्। "आपोनाराइतिप्रोक्ताआपोवैनरसूनवः ।अयनंतस्यताःपूर्वंतेननारायणः स्मृत " इतिमनुवचनाद्वानाराय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णः । "नारायणाथनमइत्यमुमेवसत्यैसंसारघोरविषसंहरणायमंत्रं । शृण्वंतुभव्यमतयोयतयोनुरागाउच्चैस्तरा मुपदिशाम्यहमूर्ध्वबाहु"रितिश्रीनारसिंहपुराणे । "नयतीतिनरःप्रोक्तःपरमात्मासनातन" इतिव्यासवचनम् ॥ ३९ ॥ यस्मिन्संख्याभेदादिनविद्यत इत्यसंख्येयः । अप्रमेयआत्मास्वरूपमस्येत्यप्रमेयात्मा । अतिशेतेसर्व मतोविशिष्टः । "विश्वतःपरमान्नित्यमि"तिश्रुतेः।शिष्टंशासनंतत्करोतीतिशिष्टकृत् । शिष्टान्करोतिपालयती तिवासामान्यवचनोधातुर्विशेषवचनो दृष्टः कुरुकाष्ठानीत्याहरणे यथातद्वादिति शिष्टकृत् । निरंजनःशुचिःसिद्धो निवृत्त अर्थ्यमानोर्थोस्येतिसिद्धार्थः । "सत्यकाम"इतिश्रुतेः । सिद्धोनिष्पन्नःसंकल्पोस्येतिसिद्धसंकल्पः।"सत्य संकल्प"इतिश्रुतेः । सिद्धिफलंकर्तृभ्यःस्वाधिकारानुरूपतो ददातीतिसिद्धिदः । सिद्धेः क्रियायाः साधकत्वात्सि

असंख्येयोप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः॥सिद्धार्थः सिद्धसंकल्पःसिद्धिदः सिद्धिसाधनः ४० वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्धनो वर्धमानश्च विविक्तःश्रुतिसागरः ॥ ४१ ॥

द्धिसाधनः ॥ ४० ॥ वृषो धर्मः पुण्यंतदेवाहःप्रकाशसाधर्म्यात्द्वादशाहप्रभृतिर्वृषाहःसोस्यास्तीतिवृषाही । वृषाहइत्यत्र "राजाहःसखिभ्यष्टजि"तिटच्प्रत्ययः । वर्षत्येषभक्तेभ्यःकामानितिवृषभः । यास्केनोक्तं । "विष्णुर्वि चक्रमणादि"ति विष्णुः । वृषरूपाणि सोपानपर्वाण्याहुः परं धामारुरुक्षोरित्यतोवृषपर्वा ॥ ६० ॥ प्रजावर्षतिचो दरंतस्येतिवृषोदरः । वर्धयतीतिवर्धनः । प्रपंचरूपेणवर्धतइतिवर्धमानः । इत्थंवर्धमानोपिपृथगेवावातिष्ठतीतिविवि क्तः । श्रुतयःसागर इवात्रनिधीयंतेइतिश्रुतिसागरः ॥ ४१ ॥ शोभनाभुजाजगद्रक्षाकरायस्येतिसुभुजः।पृथि व्यादीन्यपिधारकान्यन्यैर्धारयितुं अशक्यानितानिधारयन् नकेनचिद्धारयितुंशक्यइतिदुर्धरः । दुःखेनध्यान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समये मुमुक्षभिर्हृदये धार्यत इतिवादुर्धरः। यतो निः सृताब्रह्ममयीवाक् तस्माद्वाग्मी। महांश्चासाविंद्रश्चेति महेंद्रः।ईश्वराणामपीश्वरः।वसुधनंददातीतिवसुदः।"अन्नादो वसुदान"इतिश्रुतेः ७० दीयमानंतद्वस्वापिसएवेति वावसुः। आच्छादयत्यात्ममाययेतिवा वसुः। अंतरिक्ष एव वसति नान्यत्रेत्यसाधारणेन वसनेन बावसुः। "वसुरंतरिक्षसदि"ति श्रुतेःएकं रूपं न विद्यत इति नैकरूपइत्यर्थः।"इंद्रोमायाभिःपुरुरूपईयत"इतिश्रुतेः।ज्योतींषि रूप इत्यादिस्मृतेश्च।बृहद्वाराहादिरूपमस्य बृहद्रूपः। शिपयःपशवःतेषुप्रतितिष्ठतियज्ञरूपेणेतिशिपिविष्टो यज्ञमूर्तिः।"यज्ञोवै विष्णुःपशवः शिपिर्यज्ञएवपशुषु प्रतितिष्ठती"तिश्रुतेः। शिपयो रश्मयस्तेषु निविष्ट इतिवा। शैत्याच्छयनयोगाच्च शीति वारि प्रचक्षते।तत्पानादुक्षणाच्चैव शिपयोरश्मयो मताः। तेषु प्रवेशाद्विश्वेशः शि

सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥४२॥
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः॥ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः४३॥

पिविष्ट इहोच्यते"। सर्वेषां प्रकाशनशीलत्वात्प्रकाशनः ॥ ४२ ॥ ओजः प्राणबलम् तेजः शौर्यादयो गुणा द्युतिर्दीप्तिः ता धारयतीत्योजस्तेजोद्युतिधरः। अथवा ओजस्तेज इति नामद्वयं वा। "बलं बलवतां चाहं तेजस्तेजस्विनामह"मिति भगवद्वचनात्। ज्ञानलक्षणां दीप्तिं धारयतीति द्युतिधरः। प्रकाशस्वरूपः आत्मायस्यस प्रकाशात्मा। सवित्रादिविभूतिभिः विश्वंप्रतापयतीति प्रतापनः ॥ ८० ॥ धर्मज्ञानवैराग्यादिभिरुपेतत्वादृद्धः। स्पष्टमुदात्तमोंकारलक्षणमस्येति स्पष्टाक्षरः। ऋग्यजुःसामलक्षणोमंत्रः मंत्रवाच्यत्वाद्वा मंत्रः। संसारतापतिग्मांशुतापतापितचेतसां चंद्रांशुरिवाह्लादकरत्वाच्चंद्रांशुः। भास्करद्युतिसाधर्म्याद्भास्करद्यु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिः ॥४३॥ अमृतेमथ्यमानेपयोनिधावमृतांशुश्चंद्रः तस्योद्भवो यस्मात्सोऽमृतांशूद्भवः । भातीति भानुः "तमेव भांत मनुभातिसर्वमि"तिश्रुतेः । शश इव बिंदुर्लाच्छनमस्येति शशबिंदुश्चंद्रः तद्वत्प्रजाःपुष्णातीतिशशबिंदुः।" पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मक"इति भगवद्वचनम् । सुराणां देवानां शोभनदातॄणां चेश्वरः सुरेश्वरः। संसाररोगभेषजत्वादौषधम् । जगतां समुत्तारणहेतुत्वादसंभेदकारणाद्वा सेतुवद्वर्णाश्रमादीनामिति जगतः सेतुः । " स एव सेतुर्विधारण एषां लोकानामसंभेदाये " ति श्रुतेः ।सत्या अवितथा धर्मज्ञानादयो गुणाः पराक्रमश्च यस्य स सत्यधर्मपराक्रमः ॥ ४४ ॥ भूतभव्यभवतां भूतग्रामाणां नाथस्तैर्याच्यते तानुपतपति तेषामीष्टे शास्तीति वा भूतभव्यभवन्नाथः ॥ ३०० ॥ ॥ इति नाम्नां तृतीयं शतं विवृतम् ॥

अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ४४ ॥
भूतभव्यभवन्नाथः पवनः पावनोनलः ॥ कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥४५॥

पवत इति पवनः । " पवनः पवतामस्मी"ति भगवद्वचनात् । पावयतीति पावनः । " भीषास्माद्वातः पवत" इति श्रुतेः । अनान् प्राणान् आत्मत्वेन लातीति जीवोनलः । अनान्लातीतिवा अलतेर्गंधवाचिनो नञ्पूर्वाद्वा । " अगंधमरस मि"ति श्रुतेः । नालं पर्याप्तमस्य विद्यत इति वानलः । अनित्यनेन लोके वाऽनलः (?) कामान् हंति मुमुक्षूणां भक्तानांहिंसकानां वेति कामहा । सत्वानां कामिनां कामान् करोतीति कामकृत् । कामः प्रद्युम्नः तस्य जनकत्वाद्वा कामकृत् । अभिरूपतमः कांतः । काम्यते पुरुषार्थाभिकांक्षिभिरितिकामः । भक्तेभ्यः कामान् प्रकर्षेण ददातीति कामप्रदः । प्रकर्षेण भवनात्प्रभुः ॥ ४५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युगादेः कालभेदस्य कर्तृत्वाद्युगादिकृत् । युगादीनामारंभंकरोतीतिवायुगादिकृत् ॥ ३१० ॥ युगानि कृ
तादीन्यावर्तयतीति कालात्मनातस्माद्युगावर्तः । नैका माया विद्यते बह्वीर्मायावहतीति नैकमायः । 'नलोपो
नञ' इति नकारलोपो न भवति । अकारानुबंधस्यापि नकारस्य प्रतिषेधवाचिनो विद्यमानत्वात् । महदश
नमस्येति महाशनः कल्पांतेसर्वग्रसनात् सर्वैषां बुद्धीद्रियाणामगम्यः अदृश्यः । स्थूलरूपेण व्यक्तं स्वरूपम
स्येति व्यक्तरूपः।स्वयंप्रकाशत्वाद्योगिनांव्यक्तरूपत्वादितिवाव्यक्तरूपः।सुरारीणां सहस्राणि युद्धे जयतीति
सहस्रजित् । सर्वाणि भूतानियुद्धक्रीडादिषु सर्वत्राचिंत्यशक्तितया जयतीत्यनंतजित् ॥ ४६ ॥ परमानंद
कत्वेन प्रियइष्टः यज्ञेन पूजित इति वा इष्टः । सर्वेषामंतर्यामित्वेन विशिष्टः । शिष्टानां विदुषामिष्टः शिष्टे

युगादिकृद्युगावर्तो नैकमायो महाशनः ॥ अदृश्योव्यक्तरूपश्च सहस्रजिदनंतजित् ॥४६॥
इष्टोविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः॥क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ४७॥

ष्टः । शिष्टा इष्टा अस्येति वा शिष्टेष्टः । " प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय"इति भगवद्वचनात् ।
शिष्टैरिष्टः पूजित इति वा शिष्टेष्टः । शिखंडः कलापोलंकारोऽस्येति शिखंडी ।गोपवेषधरो यतः । नह्यति
भूतानि माययाऽतो नहुषः । णह बंधने । कामानां वर्षणाद्वृषो धर्मः। " वृषो हि भगवान् धर्मः स्मृतो लो
केषु भारत । नैघंटुकपदाख्यातैर्विद्धि मां वृषमित्युते" तिमहाभारते । साधूनांक्रोधं हंतीति क्रोधहा । असा
धुषु क्रोधं करोतीति क्रोधकृत् । क्रियत इति कर्म जगत् तस्य कर्ता । "एषां पुरुषाणांयः कर्ता यस्य वै तत्क
र्म स वै वेदितव्य"इति श्रुतेः । क्रोधकृतां दैत्यादीनां कर्ता छेदक इत्येकं वा नाम विश्वेषामालंबनत्वेन वि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वे बाहवोऽस्येति विश्वतो बाहवोऽस्येति वा विश्वबाहुः । "विश्वतो बाहुरि"ति श्रुतेः । महीं पूजां धरणीं वा धत्त इति महीधरः ॥ ४७ ॥ षड्भावविकाररहितत्वादच्युतः । "शाश्वतꣳशिवमच्युत"मितिश्रुतेः । जगदुत्पत्त्यादिकर्मभिः प्रख्यातः प्रथितः । सूत्रात्मना प्रजाः प्राणयतीति प्राणः । "प्राणो वा अहमस्मी"ति बह्वृचाः । "वायुर्वै गौतमतत्सूत्र"मिति श्रुतेः ॥ ३३० ॥ सुराणामसुराणां च यथासंख्यं प्राणं बलं च ददाति द्यति वेति प्राणदः । अदित्यां कश्यपाद्वासवस्यानुजो जात इति वासवानुजः । आपो यत्र निधीयंते सोपांनिधिः । सरसामस्मि सागर"इति भगवद्वचनम् । अधितिष्ठंति भूतानि उपादानकारणत्वेन ब्रह्मेत्यधिष्ठानम् । "मत्स्थानि सर्वभूतानी"ति भगवद्वचनात् । अधिकारिभ्यः कर्मानुरूपं फलं प्रयच्छन्न प्रमाद्यतीति अप्रमत्तः । स्वे महिम्नि

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः॥अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः॥४८॥
स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ४९ ॥

स्थितः प्रतिष्ठितः । "स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नी"ति श्रुतेः ॥ ४८ ॥ स्कंदत्यमृतरूपेण गच्छति वायुरूपेण शोषयतीति वा स्कंदः । स्कंदं धर्मपथं धारयतीति स्कंदधरः । धुरं वहति समस्तभूतजन्मादिलक्षणामिति धुर्यः । अभिमतान् वरान् ददातीतिवरदः । वरांगां दक्षिणां ददाति यजमानरूपेणेति वा वरदः । " गौर्वैवर"इति श्रुतेः ॥ ३४० ॥ मरुतः सप्तावहादीन् वाहयतीति वायुवाहनः । वसति वासयतीत्याच्छादयतीति वा स्वयमिति वासुः दीव्यति क्रीडते विजिगीषते व्यवहरति द्योतते स्तूयते गच्छतीति वा देवः । वासुश्चासौ देवश्च वासुदेवः । " छादयामि जगत्सर्वं भूत्वा सूर्य इवांशुभिः । सर्वभूताधिवासश्चवासुदेव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्ततः स्मृतः । वसनात्सर्वभूतानां वसुत्वाद्देवयोनितः । वासुदेवस्ततो ज्ञेयोयोगिभिस्तत्वदर्शिभिरित्युद्योगपर्वणि । "सर्वत्रासौ समस्ते च वसत्यत्रेति वै यतः । ततः स वासुदवेति विद्वद्भिः परिपठ्यते । सर्वाणि तत्र भूतानि वसंति परमात्मनि । भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृत" इति च विष्णुपुराणे । बृहंतो भानवो यस्य चंद्रसूर्यादिगामिनः । विश्वं जगद्भासयति स बृहद्भानुरुच्यते । आदिः कारणं स चासौ देवश्चेत्यादिदेवः । द्योतनादिगुणवान् वा देवः । सुरशत्रूणां पुराणां दारणात्स पुरंदरः । "वाचं यमपुरंदरौ चे" ति भगवतापाणिनिना निपातनात् ॥ ४९ ॥ शोकादिषड्ऊर्मिवर्जितोऽशोकः । संसारसागरात्तारयतीति तारणः। गर्भजन्मजरामृत्युलक्षणाद्भयात् तारयतीतितारः शूरो विक्रमवत्तया । शूरस्यापत्यंवसुदेवरूपः यद्वा

अशोकस्तारणः स्तारः शूरः शौरिर्जनेश्वरः॥अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः५०॥
पद्मनाभोरविंदाक्षः पद्मगर्भः शरीरभृत् ॥ महार्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः५१॥

शूरकुलोद्भवत्वाच्छौरिः । जनानां जंतूनामीश्वरो जनेश्वरः । आत्मत्वेन हि सर्वेषामनुकूलः । न हि स्वस्मिन्प्रातिकूल्यंस्वयमाचरतीत्यनुकूलः । धर्मत्राणाय शतमावर्तनानि प्रादुर्भावाअस्येति शतावर्तः । यद्वा नाडीशते प्राणरूपेणावर्तत इति वा । पद्महस्ते विद्यते इति पद्मी । पद्मनिभे ईक्षणे दृशावस्येति पद्मनिभेक्षणः ॥ ५० ॥ पद्मस्य नाभौ मध्ये कर्णिकायां स्थितइति पद्माक्षत्वादरविंदक्षः । पद्मनाभः । पद्मस्य हृदयाख्यस्य मध्ये कर्णिकायां उपास्यत्वात्पद्मगर्भः । पोषयन्नन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयच्छरीरभृत् स्वयामाययाशरीराणि बिभर्तीति वा शरीरभृत् । महती ऋद्धिर्विभूतिरस्येति महर्द्धिः । प्रपंचरूपेण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋद्धः वृद्धः पुरातन आत्मा यस्येति वृद्धात्मा । महती अक्षिणी महत्यक्षीणि वास्येति महाक्षः । गरुडांको ध्वजो यस्येति गरुडध्वजः ॥ ५१ ॥ तुला उपमानमस्य नविद्यते इत्यतुलः । "न तस्य प्रतिमास्ति यस्य नाम महद्यश"इति श्रुतेः । "न त्वत्समोस्त्यभ्यधिकः कुतोन्यत"इति स्मृतेश्च । शरीराणि शीर्यमाणत्वात्तेषु प्रत्यगात्मतया भातीति शरभः । बिभेत्यस्मात्सर्वमिति भीमः । "भीमादयोपादान"इति पंचमीसमासवर्तिनाम । समयं मरणयोगं जानाति सृष्टिस्थित्यंतकालवित् । षट् समयान् जानातीति वा समयज्ञः । सर्वभूतेषु समत्वं यज्ञनंसाध्यस्येति वा । "समत्व

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥ सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः ॥ ५२ ॥
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥ महीधरो महाभागो वेगवानमिताशनः ॥ ५३ ॥

माराधनमच्युतस्ये"ति प्रह्लादवचनम् । यज्ञेषु हविर्भागं हरतीतिहविर्हरिः । "अहं हि सर्वयज्ञानांभोक्ताचप्रभुरेवच"इतिभगवद्वचनात् । अथवाहूयतेहविषेतिहविः "अवध्रंपुरुषंपशुं"इति हविष्टंश्रूयते । स्मृतिमात्रेण पुंसां पापं हरतीति हरिद्वर्णाद्वा हरिः । "हराम्यघं हि स्मर्तॄणां हविर्भागं क्रतुष्वहं ॥ वर्णश्चमे हरित्श्रेष्ठस्तस्माद्धरिरहंस्मृत"इति व्यासवचनात् । सर्वैर्लक्षणैः प्रमाणैर्लक्षणं (दर्शनं) ज्ञानं जायते यत्तद्विनिर्दिष्टं सर्वलक्षणं तत्र साधुः सर्वलक्षणलक्षण्यः । ५० तस्यैव परमार्थत्वात् लक्ष्मीर्यस्य नित्यं वक्षसि वसतीति लक्ष्मीवान् । समितिं युद्धं जयतीति समितिंजयः ॥ ५२ ॥ विगतः क्षरोनाशो यस्यासौ विक्षरः । स्वच्छंदतया रोहितां मूर्तिं मत्स्यविशेषमूर्तिं वा वहन् रोहितः । मुमुक्षवस्तं देवं मार्गयंति इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मार्गः । परमानंदो येन प्राप्यते स मार्गइति वा । उपादानं निमित्तं च कारणं स एवेति हेतुः । दमादिसाधनेनोदारा उत्कृष्टा मतिर्या तया गम्यत इति दामोदरः । "दमाद्दामोदरं विष्णु"रिति महाभारते । यशोदया दाम्नोदरे बद्धः इति वा दामोदरः । "तयोर्मध्यगतं बद्धं दाम्ना गाढं तयोदरे । ततश्च दामोदरतां स ययौ दामबंधनात्"इतिब्रह्मपुराणे । "दामानि लोकनामानि तानियस्योदरांतरे । तेन दामोदरो देवः श्रीधरस्तु समाश्रित"इति व्यासवचनाद्वा दामोदरः । सर्वानभि भवति क्षमत इति वा सहः । महीं गिरिरूपेण धत्ते इति महीधरः । "वनानि विष्णुर्गिरयो दिशश्चे"ति पराशरोक्तेः । स्वेच्छया धारयन्महींदेहंवा । महांतिप्रकृष्टानिभोजनानिविभागजन्यानिभुक्तइतिमहाभागः महान् भागो भाग्यमस्यावतारेष्विति महाभागः । ३७० वेगो जवस्तद्वान् वेगवान् ॥ "अनेजदेकं मनसो जवीय"इतिश्रुतेः । संहारसमये विश्वमश्नातीत्यमिताशनः ॥ ५३ ॥ प्रपंचोत्पत्त्युपादानकारणत्वादुद्भवः ॥ उद्भवतो भवाद् संसाराद्धिति वा । सर्गकाले प्रकृतिपुरुषं च प्रविश्य क्षोभयामासेति क्षोभणः । "प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास भगवान् सर्गकालेव्ययाव्ययावि" ति विष्णुपुराणे । यतो दीव्यति क्रीडति सर्गादिभिर्विजिगीषतेऽसुरादीन् व्यवहरति सर्वभूतेषु आत्मतया द्योतते स्तूयते स्तुत्यैः सर्वत्रगच्छतितस्माद्देवः । "एको देव"इति मंत्रवर्णात् । श्रीर्विभूतिर्यस्योदरांतरे जगद्रूपा स्थिता स श्रीगर्भः । परमश्चासौ ईशनशीलश्चेति परमेश्वरः । "समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं"इति भगवद्वचनात् । जगदुत्पत्तौसाधकतमंकरणं उपादानकारणंनि

उद्भवः क्षोभणो देवःश्रीगर्भः परमेश्वरः ॥ करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ५४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्तकारणंचेतिकारणं । कर्ता स्वतंत्रः । ८० विचित्रं भुवनं कृतवानिति विकर्ता । स्वरूपं सामर्थ्यं चेष्टितं वा तस्य ज्ञातुं न शक्यत इति गहनः । गूहते संवृणोति स्वरूपादीनि मायया गुहः 'नाहंप्रकाशः सर्वस्ययोगमायासमावृत'इतिभगवद्वचनात् ॥ ५४ ॥ संविन्मात्रस्वरूपत्वाद्व्यवसायः । यस्मिन्व्यवस्थितिः सर्वस्येति व्यवस्थानः । लोकपालाद्यधिकारजरायुजांडजस्वेदजोद्भिज्जब्राह्मणक्षत्रियवैश्यशूद्रावांतरवर्ण ब्रह्मचारीगृहस्थवानप्रस्थसन्यासलक्षणाश्रमतद्धर्मादिकान् विभज्य करोतीति वा व्यवस्थानः । "कृत्यल्युटोबहुल"मिति बहुलग्रहणात्कर्तरि ल्युट् प्रत्ययः । यत्र भूतानां संस्थितिः प्रलयात्मिका

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥ परर्द्धिः परमस्पष्टः स्तुष्टः पुष्टः शुभेक्षणः ॥ ५६ ॥ रामो विरामो विरजो मार्गो नेयो नयोऽनयः ॥ वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ५६

सम्यीचीनं स्थानमस्येति वा संस्थानः ध्रुवादीनां कर्मानुरूपं स्थानं ददातीति स्थानदः । अविनाशित्वाद्ध्रुवः । परा ऋद्धिर्विभूतिरस्येति परर्द्धिः । परामालक्ष्मीःशोभास्येति परमः सर्वोत्कृष्टोवा । अनन्याधीनसंसिद्धित्वात्संविदात्मतया परमस्पष्टः । ९० परमानंदैकरूपत्वात्तुष्टः । सर्वसंपूर्णत्वात्पुष्टः । ईक्षणं दर्शनं यस्य सर्वशुभं शुभकरं नराणां मुमुक्षूणां मोक्षदं भोगार्थिनां भोगदं संदेहविच्छेदकारणं पावनं हृदयग्रंथेर्विच्छेदकरं सर्वकर्मणां क्षपणं अविद्यानिवर्तकं स शुभेक्षणः । "भिद्यते हृदयग्रंथिः" इत्यादिस्मृतेः ॥ ५५ ॥ नित्यानंदेस्मिन्योगिनो रमंत इतिः रामः । "रमंते योगिनो यस्मिन्नित्यानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वे चिदात्मानि। इति रामपदेनैतत्परंब्रह्माभिधीयते"इति पद्मपुराणे। स्वेच्छया वपुर्वहन् वा दाशरथी रामः। विरामः अवसानं प्राणिनांयस्मिन्निति विरामः। विगतं रजो यस्य विषयसेवायामिति 'वि रजः विरजः पर आकाशादे'ति श्रुतेः। ये विदित्वामृतत्वाय कल्पंते मुमुक्षवःस एव पंथा मार्गः। "नान्यः पंथा विद्यतेऽयनाये"तिश्रुतेः। मार्गेण सम्यग्ज्ञानेन जीवःपरमात्मतया नीयत इति नेयः। "नयतीति नयो नेता मार्गो नेयो नयोऽनय"इति त्रिरूपः परिकल्प्यते। नास्य नेता विद्यते इत्यनयः ४०० इति नाम्नो चतुर्थं शतंविवृतं। विक्रमशालित्वाद्वीरः। शक्तिमतां विरिंच्यादीनामपि श क्तिमत्त्वाच्छक्तिमतांश्रेष्ठः। सर्वभूतानां धारणाद्धर्मः "अणुरेष धर्मः इति"श्रुतेः। धर्मैराराध्यत इति

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः, पृथुः ॥ हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ५७

वा धर्मः। श्रुतयः स्मृतयश्च यस्याज्ञाभूताः स एव सर्वधर्मविदामुत्तम इति धर्मविदुत्तमः॥ ५६ ॥ विविधाकुं ठा गतेः प्रतिहातिर्विकुंठा विकुंठायाः कर्तेति वैकुंठः। जगदारंभे विश्लिष्टानि भूतानि परस्परं संश्लेषयन् ते षां गतिं प्रत्यवघ्नादिति। "मया संश्लेषिता भूमिराद्भिर्व्योम च वायुना। वायुश्च तेजसा सार्धं वैकुं ठत्वं ततो मये" तिशांतिपर्वणि। सर्वस्मात्पुरासदनात्सर्वपापस्य सादनाद्वा पुरुषः। "सयत्पूर्वोस्मा त्सर्वस्मात् सर्वान् पाप्मन औषतस्मात्पुरुष"इति श्रुतेः। पुरे शयनाद्वा पुरुषः सवाअयं पुरुषः"सवासु पूर्षु पुरीशय"इति श्रुतेः। प्राणिति निःक्षेत्रज्ञरूपेण प्राणात्मना चेष्टयन्वाप्राणः। चेष्टां करोति श्वसन रूपेणेति विष्णुपुराणे। द्यति खंडयति प्राणिनां प्राणान्प्रलयादिष्विति प्राणदः। प्रणौतिप्रणमतीतिवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रणवः । "तस्मादोमितिप्रणौतीति"श्रुतेः प्रणम्यते इति वा प्रणवः 'प्रणमंतीह यं वेदाः सोस्मात्प्रणव उच्यत"इति सनत्कुमारवचनात् । प्रपंचरूपेण विस्तृतत्वात्पृथुः । ४१० । हिरण्यगर्भसंभूतिकारणं हिरण्मयमंडं यद्वीर्यसंभूतं तदस्य गर्भ इति हिरण्यगर्भः । त्रिदशशत्रून् हंतीति शत्रुघ्नः । कारणत्वेन सर्वकार्याणां व्याप्तत्वाद्व्याप्तः । वाति गंधं करोतीति वायुः । "पुण्यो गंधः पृथिव्यां चे"ति भगवद्वचनात् । "अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज"इति उद्योगपर्वणि । "द्यौरंतरिक्षं पृथिवी वाधस्तयोर्यस्मादजायत । मध्ये वैराजरूपेणे"तिवाऽधोक्षजः अधोभूतेप्रत्यक्प्रवाहितेअक्षगणेजायतइतिअधोक्षजः । "अधोभूतेह्यक्षगणेप्रत्यग्रूपप्रवाहितोजायतेतस्यवैज्ञानंतेनाधोक्षजउच्यते" ॥ ५७ ॥ कालात्मना

ऋतुः सुदर्शनः कालः परमेष्ठी परारिग्रहः ॥ उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ५८

ऋतुशब्देन लक्ष्यत इति ऋतुः । शोभनं निर्वाणफलं दर्शनं ज्ञानमस्येति सुदर्शनः । शुभेदर्शने ईक्षणे पद्मपत्रायते अस्येति वा स्वेच्छया सुंदरं देहं वहति सुखेन दृश्यते भक्तैरिति वा सुदर्शनः । कलयति सर्वमिति कालः "कालः कलयतामह"मिति भगवद्वचनात् । परमे प्रकृष्टे स्वे महिम्नि हृदयाकाशे स्थातुं शीलमस्येति परमेष्ठी " परमेष्ठी विभाजत"इति मंत्रवर्णात् । शरणार्थिभिः परितो गृह्यते सर्वगतत्वात्परितो ज्ञायते इति वा पत्रपुष्पादिकं भक्तैरर्पितं परिगृह्णातीति वा परिग्रहः । २० । सूर्यादीनामपि भयहेतुत्वादुग्रः । "भीषास्माद्वातः पवते भीषोदेति सूर्य"इति श्रुतेः । संवसंति भूतान्यस्मिन्निति संवत्सरः । जगद्रूपेण वर्धमानत्वात्सर्वकर्माणि क्षिप्रं करोतीति वा दक्षः । संसारसागरे क्षुत्पिपासादि षड्भिर्भिस्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रंगितैः अविद्याद्यैर्महाक्लेशैर्मदादिभिरुपक्लेशैश्च वशीकृतानां विश्रांतिं कांक्षमाणानां विश्रामं मोक्ष करोतीति विश्रामः । विश्वस्माद्दक्षिणः शक्तो विश्वेषु कर्मसु दाक्षिण्याद्वा विश्वदक्षिणः ॥ ५८ ॥ विस्तीर्यते समस्तानि जगंति यस्मिन्निति विस्तारः । स्थितिशीलत्वात्स्थावरः स्थितिशीलानि पृथिव्यादी नितिष्ठंत्यस्मिन्निति स्थाणुः स्थावरश्चासौ स्थाणुश्चेति स्थावरस्थाणुः । संविदात्मना प्रमाणं प्रत्यक्षादि प्रमाणं वा । अन्यथाभावव्यतिरेकेण कारणमिति बीजमव्ययं । सुखरूपत्वात्सर्वैरर्थ्यत इतिअर्थः । ३० । न विद्यतेअर्थः प्रयोजनमाप्तकामत्वादस्येत्यनर्थः । महांतः कोशा अन्नमयादयः छादका अस्येति म

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ॥ अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ५९ ॥ अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ॥ नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ६० ॥

हाकोशः । महान् भोगः सुखरूपोस्येति महाभोगः । महद्भोगसाधनलक्षणं धनमस्येति महाधनः ॥ ५९ ॥ अवाप्तसर्वकामत्वान्निर्वेदोस्यनविद्यत इत्यनिर्विण्णः । वैराजरूपेण स्थितः स्थविष्ठः । "अग्निर्मूर्धा चक्षुषी चंद्रसूर्या" विति श्रुतेः । अजन्मा अभूः अथवा भवतीति भूः । भूसत्तायांसपंदादित्वाद्भवतेः क्विप् मही वा । यूपे पशुवत् समाराधनात्मका धर्मास्तत्र बध्यंत इति धर्मयूपः । यस्मिन्नर्पिता महामखा यज्ञा निर्वाणलक्षणंफलं प्रयच्छंतो महान्तो जायंते स महामखः । "नक्षत्रतारकैः सार्धं चंद्रसूर्यादयो ग्रहाः । वायुपाशमयैर्वैर्नैबद्धा ध्रुवसंज्ञिते । सज्योतिषां चक्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भ्रामयंस्तारामयस्य शिशुमारस्यपुच्छदेशे व्यवस्थितो ध्रुवः तस्य शिशुमारस्य ज्योतिश्चक्रस्यनेमिवद्वर्तमानस्य हृदयं विष्णुरिति कथितो नक्षत्रनेमिः । शिशुमारवर्णने विष्णुहृदयमिति स्वाध्यायब्राह्मणे श्रूयते । ४० । चंद्ररूपेण नक्षत्री "नक्षत्राणामहं शशी" ति भगवद्वचनात् । समस्तकार्येषु समर्थः क्षमः क्षमत इति वा क्षमः "क्षमया पृथिवीसम" इति वाल्मीकिवचनात् । सर्वे विकारेषु क्षयितेषु स्वात्मनावस्थित इति क्षामः "क्षा योम" इति निष्ठायांतकारस्य मकारादेशः । सृष्ट्याद्यर्थे सम्यगीहते समीहनः ॥ ६० ॥ सर्वयज्ञस्वरूपत्वाद्यज्ञः । सर्वेषांदेवानांयज्ञाकारेणवर्ततइतिवायज्ञः "यज्ञो वै विष्णु" रितिश्रुतेः । यष्टव्योप्ययमेवयज्ञफलदातृत्वादितीज्यः । "येयजंति मखैः पुण्यैर्देवतादीन् पितॄनपि । आत्मानमात्मना नित्यं विष्णुमेव यजंतित"

यज्ञ ईज्यो महेज्यश्च क्रतुःसत्रं सतांगतिः ॥ सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ६१

इति हरिवंशे । सर्वासु देवतासु यष्टव्यासु प्रकर्षेणायमेव यष्टव्यो मोक्षफलदातृत्वादिति महेज्यः । यूपसहितो यज्ञः क्रतुः । असनोपायिचोदनालक्षणं सत्रं सतस्त्रायत इतिवा सत्रं । सतां मुमुक्षूणां नान्या गतिरिति सतांगतिः । ५० । सर्वेषां प्राणिनां कृताकृतं सर्वं पश्यतीति स्वाभाविकेन बोधेनेति सर्वदर्शी । स्वभावेन विमुक्तश्चासावात्मास्येति विमुक्तात्मा । "विमुक्तश्च विमुच्यत" इतिश्रुतेः । सर्वश्चासौज्ञश्चेति सर्वज्ञः "इदं सर्वं यदयमात्मे" ति श्रुतेः, ज्ञानमुत्तममित्येतत्सविशेषणमेकं नाम ज्ञानं प्रकृष्टं अजन्यं अनवच्छिन्नं सर्वस्य साधकतममिति ज्ञानमुत्तमम् । "सत्यंज्ञानमनंतंब्रह्म" इतिश्रुतेः ॥ ६१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शोभनं व्रतमस्येति सुव्रतः । "सकृदेव प्रपन्नाय तवास्मीति तु याचते । अभयं सर्वथा तस्मै ददाम्येतद्व्रतं मम"ति श्रीरामायणे रामवचनम् । शोभनं सुखमस्येति सुमुखः । प्रसन्नवदनंचारु पद्मपत्रायतेक्षणं"इतिश्रीविष्णुपुराणे । वनवासे सुमुखत्वाद्वा दाशरथी रामः सुमुखः"स पितुर्वचनंश्रीमानभिषेकपरं प्रियं । मनसा पूर्वमासाद्यवाचा प्रतिगृहीतवान् । इमानि तु महारण्ये विहृत्य नवपंचच । वर्षाणि परम प्रीतः स्थास्यामि वचने तव । न वनंगंतुकामस्य त्यजतश्च वसुंधराम् । सर्वलोकातिगस्यैव मनोरामस्य विव्यथ"इतिनव्यथांप्राप्तवान् इति रामायणे महाभारते च सर्वविद्योपदेशेन वा सुमुखः "यो ब्रह्माणं विदधाति पूर्वंयोवै वेदांश्च प्रहिणोति तस्मैइत्यादिश्रुतेः । शब्दादिस्थूलकरणरहितत्वाच्छब्दादयो ह्याका

सुव्रतः सुमुखःसूक्ष्मः सुघोषः सुखदः सुहृत्॥ मनोहरो जितक्रोधो वीरबाहुर्विदारणः ६२
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ॥ वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ६३

शादीनामुत्तरोत्तरस्थूलत्वकारणानि तदभावात्सूक्ष्मः "सर्वगतं सूक्ष्म"मिति श्रुतेः । शोभनो घोषो वेदात्मको स्येति मेघगंभीरघोषत्वाच्च सुघोषः । सद्वृत्तानां सुखं ददात्यसद्वृतानां सुखं खंडयतीति वा सुखदः । प्रत्युपकारनिरपेक्षतयोपकारित्वात्सुहृत् ४६० निरतिशयानंदरूपत्वान्मनोहरतीतिमनोहरः "योवैभूमातत्सुखंनाल्पेसुखमस्तीतिश्रुतेः । जि तः क्रोधोयेन स जितक्रोधः । वेदमर्यादास्थापनार्थं नतु कोपवशादित्यतस्त्रिदशशत्रून्निघ्न्वेदमर्यादां स्थापयन् विक्रिमशालीबाहुरस्येति वीरबाहुः । अधार्मिकान् विदारयन्विदारणः ॥ ६२ ॥ प्राणिनः स्वापयन्नात्मसंबोधविधुरान् मायया कुर्वन् स्वापनः । स्वतंत्रः स्ववशः । जगदुत्पत्तिस्थिति लयहेतुत्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त् । आकाशवत्सर्वगतत्वाव्यापी 'आकाशवत्सर्वगतश्चनित्यइति श्रुतेः कारणत्वेन सर्वकार्याणां व्यापना द्वाव्यापी । जगदुत्पत्त्याद्यनेकरूपाणि निमित्तविभूतिभिः अनेकधातिष्ठन्नेकात्मा । जगदु त्पत्तिसंपत्तिविप त्तिप्रभृतिकर्माणि करोतीति नैककर्मकृत् । वसत्यत्राखिलमिति वत्सरः वत्सरातीतिवा । ४७० । भक्तस्नेहित्वा द्वत्सलः । "वत्सांशाभ्यां कामवल"इतिलटच् प्रत्ययविधानात् वत्सानां पालनाद्वत्सी जगत्पितुस्तस्य वत्सभूताः प्रजा इति वा वत्सी । रत्नानिगर्भभूतानि अस्येति समुद्रः रत्नगर्भः । धनानामीश्वरः ध नेश्वरः ॥ ६३ ॥ धर्मं गोपायतीति धर्मगुप् "धर्मसंस्थापनार्थाय संभवामि युगे युग"इति भगवद्वच नात् । धर्माधर्मविहीनोपि धर्ममर्यादास्थापनार्थं धर्ममेव करोतीति धर्मकृत् । धर्मान् धारयिता धर्मी अ

धर्मगुब् धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ॥ अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः॥ ६४ ॥

वितथं परं ब्रह्म सत् "सदेव सौम्येद"मिति श्रुतेः । अपरं ब्रह्मासत् प्रपंचरूपेण । वाचारंभणं विकारो नामधेय"मिति श्रुतेः । सर्वाणि भूतानि क्षरम् । ४८० । कूटस्थोऽक्षरम् । क्षरः सर्वाणि भूतानि कूटस्थो क्षर उच्यत"इति भगवद्वचनात् आत्मनि कर्तृत्वादि विज्ञानं कल्पितमिति तद्वासनावकुंठितो जीवोऽ विज्ञाता । आदित्यादिगता अंशवोस्यैवेत्ययमेव मुख्यः सहस्रांशुः "येन सूर्यस्तपति तेजसेद्ध"इति श्रुतेः ।"यदादित्यगतं तेज" इत्यादिस्मृतेश्च । विशेषेण शेषदिग्गजभूधरान् सर्वभूतानि वा विदधाती ति विधाता । नित्यनिष्पन्नचैतन्यरूपत्वात्कृतलक्षणः कृतानि लक्षणानि शास्त्राण्यनेनेति वा कृ तलक्षणः "वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दना" दित्यत्रैव वक्ष्यति । सजातीयविजातीयव्यव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च्छेदकंलक्षणं सर्वभावनाकृतमनेनेति वाकृतलक्षणः आत्मनः श्रीवत्सलक्षणं वक्षसि तेन कृतमिति वा कृतलक्षणः ॥ ६४ ॥ गभस्तिचक्रस्य मध्ये सूर्यात्मना स्थित इति गभस्तिनेमिः । सत्त्वंगुणप्रकाशकं प्राधान्येनाधितिष्ठतीति सर्वप्राणिषु तिष्ठतीति वा सत्त्वस्थः । विक्रमशीलत्वात्सिंहवत्सिंहः नृशब्दलोपेनसत्यभामाभामेतिवद्वा नृसिंहः सिंहः । भूतानां महानीश्वरो भूतेन सत्येन स एव परमो महानीश्वर इतिवाभूतमहेश्वरः । सर्वभूतान्यादीयंतेनेनेत्यादिः आदिश्चासौदेव श्चेत्यादिदेवः ४९० सर्वान्भावान्परित्य ज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेवः इतिश्रुतेः । देवनांप्राधान्याद्देवानामीशो देवेशः । देवान् बिभर्तीति देवभृत् शक्रस्तस्यापि शासितेति देवभृद्गुरुः देवात्तांभरणात्सर्वविद्यानांभरणाद्वादेवभृद्गुरुः

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥६५॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपींद्रो भूरिदाक्षिणः॥६६॥

॥६५॥ जन्मसंसारसागरादुत्तारयतीत्युत्तरः सर्वोत्कृष्ट इति वा उत्तरः। "विश्वस्मादिंद्र उत्तर" इति श्रुतेः । गवां पालनाद्गोपवेषधरो गोपतिः गौर्मही तस्याः पतित्वाद्वा गोपतिः । समस्तभूतानिपालयन् जनकोजगतः इति गोप्ता । न कर्मणा न ज्ञानकर्मभ्यां वा गम्यते ज्ञानेनैवगम्यते इति ज्ञानगम्यः कालेनापरिच्छिन्नत्वात् पुरा भवतीति पुरातनः। शरीरारंभकभूतानां भरणात् प्राणरूपधरः शरीरभूतभृत्। पालको भोक्ता। निरतिशयानंदसंदोहसंभोगाद्वाभोक्ता इतिनाम्नांपंचशतंविवृतं ५०० कपिर्वराहः इंद्रश्चेति कपींद्रो वराहमूर्तिः कपीनांवानरादीनांचेंद्रः कपींद्रो राघवो वा । भूरयो यज्ञदक्षिणाः धर्ममर्यादां दर्शयंतो यज्ञं कुर्वतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्यत इति भूरिदक्षिणः ॥ ६६ ॥ सोमं पिबति सर्वयज्ञेषु यष्टव्यत्वाद्देवतारूपेणेति सोमपः । ध र्ममर्यादां दर्शयन्यजमानरूपेण वा सोमपः । स्वात्मामृतरसं पिबन्नमृतपः । मथितममृतमसुरैर्हीयमाणं रक्षित्वा देवान् पाययित्वा स्वयमप्यपिबदिति वा । सोमरूपेणौषधीः पोषयन् सोमः । उमया सहवर्ततइति शिवो वासोमः । पुरून् बहूनजयतीति पुरुजित् । विश्वरूपत्वात्पुरुः उत्कृ ष्टत्वात्सत्तमः पुरुश्चासौ सत्तमश्चेति पुरुसत्तमः । विनयं दंडंदुष्टानांप्रजानांकरोतीति विनयः । समस्तान् ज यतीति जयः । सत्या संधा संकल्पो यस्येति सत्यसंधः "सत्यसंकल्प" इति श्रुतेः १० । दाशो दानं तदर्हती ति दाशार्हः दाशृदान इति धातुपाठाद्दाशार्हकुलोद्भवत्वाद्वादाशार्हः । सात्वतं नाम तंत्रं तत्करोति त

सोमपो मृतपः सोमः पुरुजित्पुरुसत्तमः॥ विनयो जयः सत्यसंधो दाशार्हः सात्वतांपतिः॥ ६७

जीवो विनयितासाक्षी मुकुंदोमितविक्रमः॥ अंभोनिधिरनंतात्मा महोदधिशयोंतकः ॥६८॥

दाचष्ट इति णिचि कृते 'क्विप्च'ति क्विप्प्रत्यये कृते 'च णेरनिटी'ति णिलोपे च कृते पदं सात्वंतः तेषां पति र्योगक्षेमकर इति सात्वतांपतिः ॥ ६७ ॥ प्राणान् क्षेत्रज्ञरूपेण धारयन् जीवः विनयित्वं विनयितानां च साक्षात्पश्यति प्रजानामिति विनीयतासाक्षी । अथवा नयतेर्गतृवाचिनो रूपम् विनयिता अ साक्षी असाक्षाद्द्रष्टा आत्मातिरिक्तं वस्तु न पश्यतीत्यर्थः । मुक्तिं ददातीति मुकुंदः । पृषोदरादित्वा त्साधुत्वं वर्णाक्षरसाम्यान्निरुक्तिवचनान्नैरुक्तानां मुकुंद इति निरुक्तिः । अमिता अपरिच्छिन्ना विक्रमास्त्रयः पादविक्षेपा अस्येत्यमितविक्रमः अमितंविक्रमपंशौर्यमस्येति वाऽमितविक्रमः । अंभांसिदेवादयोस्मिन्निधीयंत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्यंभोनिधिः ।"तानिह वाप्तानि चत्वार्यंभांसिदेवा मनुष्याः । पितरोऽसुरा"इति श्रुतेः सागरोवा 'सरसामस्मि सागरइ'तिभगवद्वचनात । देशतः कालतोवस्तुतश्चापरिच्छिन्नत्वादनंतात्मा । संहृत्य सर्वभूतान्येकार्णवंजगत्कृत्वाधः शेते इति महोदधिशयः । अंतंकरोति भूतानामित्यंतकः"तत्करोति तदाचष्टे"इति'णिचिपत्ययेकृतेण्वुल्तृचा"वितितृचावितिण्वुल्नस्य"युवोरनाका" वित्यकादेशः ५२०,६८ आद्विष्णोरजायतेति कामोजः।महःपूजात दर्हत्वान्महार्हः । स्वभावेनैवभाव्योनित्यनिष्पन्नरूपत्वादितिस्वाभाव्यः। निर्जिता अमित्राअंतर्वर्तिनःरागद्वेषादयो बाह्या रावणादयश्च येनासौ जितामित्रः । स्वात्मामृतरसास्वादान्नित्यं प्रमोदते ध्यायिनां

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥ ६९ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् ॥ ७० ॥

ध्यानमात्रेण प्रमोदं कुरुत इति वा प्रमोदनः । आनंदस्वरूपमस्येत्यानंदः"एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति"इतिश्रुतेः । नंदयतीतिनंदनः । सर्वाभिरुपपत्तिभिः समृद्धो नंदः सुखं वैषयिकं नास्य विद्यतइतिवानंदः ।"वायो वै भूमा तत्सुखं नाल्पे सुखमस्ती"ति श्रुतेः । सत्याधर्मज्ञानादयोस्येति सत्यधर्मा त्रयो विक्रमास्त्रिपुलोकेषु क्रांता यस्य सत्रिविक्रमः ।"त्रीणिपदा विचक्रम" इति श्रुतेः । "त्रिरित्येव त्रयो लोकाः कीर्तिता मुनिसत्तमैः । क्रमसे तांस्तथा सर्वांस्त्रिक्रमोसि जनार्दन "तिहरिवंशे ५३० ६९ महर्षिः कपिलाचार्यइतिसविशेषणमेकंनाम । महांश्चासावृषिश्चेति महर्षिः कृत्स्नस्य देवस्य दर्शनात् अन्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तु वेदैकदर्शनादृषयः । कपिलश्चासौ सांख्यस्य शुद्धतत्त्वविज्ञानस्याचार्यश्चेति कपिलाचार्यः । "शुद्धात्मतत्त्व विज्ञानंसांख्यमित्यभिधीयते" इति व्यासस्मृतेः । "ऋषिप्रभूतं कपिलं महांतमि"तिश्रुतेश्च "सिद्धानां कपिलो मुनि"रितिस्मृतेश्च । कृतं कार्यं जगत् ज्ञःआत्मा । कृतंच ज्ञश्चेति कृतज्ञः । मेदिन्याः भूम्याः पतिर्मेदिनीपतिः । त्रीणि पदान्यस्येति त्रिपदः । "त्रीणि पदा विचक्रम"इति श्रुतेः । गुणावेशेनसंजातास्तिस्रो दशा अवस्थास्तासामध्यक्ष इति त्रिदशाध्यक्षः । मत्स्यरूपी महतिशृंगेप्रलयांभोधौनावं बद्ध्वा चिक्रीड इति महाशृंगः । कृतस्यांतं संहारं करोतीति कृतांतकृत् कृतांतंमृत्युंकृंततिवाकृतांतकृत् ॥७०॥ महांश्चासौ वराहश्चेति महावराहः गोभिर्वाणीभिर्विदतेवेत्ति वेदांतवाक्यैरिति वा गोविंदः । "गोभिरेव यतो वेद्योगोविंदः स उदाहृत"

महावराहो गोविंदः सुषेणः कनकांगदी ॥ गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ७१॥
वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः॥वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः७२

इति विष्णुतिलके । शोभना सेवा गणात्मिका यस्येति सुषेणः ४० कनकमयान्यंगदानि यस्यसकनकांगदीरह स्योपनिषद्विद्याबोधत्वाद्गुहायां हृदयाकाशेनिहित इति वा गुह्यः । ज्ञानैश्वर्यबलादिभिर्गभीरो गभीरः । दुःप्रवे शत्वाद्गहनः । अवस्थात्रयभावाभावसाक्षित्वाद्गहनो वा । वाङ्मनसागोचरत्वाद्गुप्तः "एषु सर्वेषु भूतेषु गूढात्मा न प्रकाशत"इतिश्रुतेः । "मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदां । धारयंल्लोकरक्षार्थमुक्तश्चक्रगदाधर"इति ॥७१॥ विदधातिसृजतीतिविधातावेधाः पृषोदरादित्वात्साधुत्वम् । स्वयमेव कार्यस्यकारणंगं सहकार्यस्येति स्वांगः । न केनाप्यवतारेषु जितइत्यजितः । कृष्णद्वैपायनःकृष्णः । "कृष्णद्वैपायनं व्यासं विद्धि नारायणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रभुम् । को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेत्" । इतिविष्णुपुराणवचनात् ५५० स्वरूपसामर्थ्यादेः प्रच्युत्य भावाद्दृढः । संहारसमये युगपत्प्रजाः संकर्षतीति संकर्षणः नच्योतति स्वपदादित्यच्युतःसंकर्षणोच्युतइति नामैकं सविशेषणं । वृणोति व्रियते वावरुणः वरुणाशांदिशंसायंगतआदित्योवरुणःरश्मिसंवरणात्सायंगतः सूर्यो वरुणः "इमं मे वरुणश्रुधीहवम्"इति मंत्रवर्णात् वरुणो यादसामहमिति भगवद्वचनात् । वरुण स्यापत्यंवसिष्ठोगस्त्योवा वारुणः । वृक्ष इवाचलतया स्थित इति वृक्षः " वृक्षवत्स्तब्धोदिवितिष्ठ त्येक" इतिश्रुतेः व्याख्यर्थादक्षतेर्धातोः पुष्करोपपदादणिप्रत्ययेसति पुष्कराक्षः हृदयपुंडरीके चिंति तः चित्स्वरूपेण प्रकाशत इति वा पुष्कराक्षः । सृष्टिस्थित्यंतकर्माणि मनसैव करोतीति महामनाः

भगवान् भगहाऽऽनंदी वनमाली हलायुधः॥आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ७३

"मनसैव जगत्सृष्टिं सहारं च करोति य,,इति,विष्णुपुराणे ॥ ७२ ॥५५७॥ "ऐश्वर्यस्य समग्रस्य धर्मस्य यश सः श्रियः । वैराग्यस्य च मोक्षस्य षण्णां भग इतीरिणा" । सयस्यास्तीति भगवान् । "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति" विष्णुपुराणे । ऐश्वर्यादिकंसंहार समयेहंतीति भगहा । सुखरूपत्वादानंदी सर्वसंपत्समृद्धत्वादानंदी वा ६० भूततन्मात्रनिर्मितां वैजयंत्याख्यां व नमालां वहन् वनमाली । हलमायुधमस्येति हालयुधो बलभद्राकृतिः । अदित्यां कश्यपाद्वामनरूपेण जातइत्यादित्यः । ज्योतिषि सवितृमंडले स्थितो ज्योतिरादित्यः ज्योतिश्चासावादित्यश्चे तिवा । द्वंद्वानि शीतोष्णादीनि सहत इति सहिष्णुः । गतिश्चासौ सत्तमश्चेति गतिसत्तमः ॥ ७३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शोभनमिन्द्रियादिमयं शार्ङ्गं धनुरस्यास्तीति सुधन्वा । शत्रूण। खंडनात् खंडः परशुरस्य जामदग्न्याकृतेरिति खंडपरशुः । शिवोवाऽखंडपरशुरस्येतिवा । सन्मार्गविरोधिनां दारुणत्वाद्दारुणः । द्राविणं वांछितं वित्तंभक्तेभ्यः प्रददातीति द्रविणप्रदः ५७० दिवस्पर्शनाद्दिविस्पृक् । सर्वदृशां सर्वज्ञानानां विस्तारकृव्यासः सर्वदृग्व्यासःअथवासर्वा च सा दृक्चेतिसर्वदृक् सर्वाकारं ज्ञानं सर्वस्य दृष्टित्वाद्वा सर्वदृक् । ऋग्वेदादिविभागेन चतुर्धावेदा व्यस्ताआद्योवेदः एकविंशतिधाकृतः द्वितीयएकोत्तरशतधाकृतः सामवेदः सहस्रधाकृतः अथर्ववेदःनव धा शाखाभेदेनकृतः अन्यानि पुराणानि व्यस्तान्यनेनेति व्यासः ब्रह्मा । वाचस्पतिरयोनिजः वाचोविद्यायाः पतिर्वाचस्पतिः जनन्यां न जायत इत्ययोनिजः वाचस्पतिरयोनि

सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ॥ दिविस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः७४

जइतिसविशेषणमेकंनाम ॥ ७४ ॥ वेदव्रतसमाख्यातैस्त्रिभिः सामभिः सामगैः स्तुत इति त्रिसामा । सामगायतीति सामगः । वेदानां मध्ये सामवेदः साम "वेदानां सामवेदोस्मीति"भगवद्वचनात् । सर्वदुःखोपशमलक्षणं परमानंदरूपं निर्वाणं वेदः । संसाररोगस्यौषधं भेषजं यद्वा बिभेत्यस्मादितिभेषजं । संसाररोगनिर्मोक्षकारिणीं परां विद्यामुपदिशतीति भिषक् । "भिषक्तमं त्वा भिषजां शृणोमी"तिश्रुतेः । मोक्षार्थं चतुर्थमाश्रमं कृतवानिति संन्यासकृत् ५८० संन्यासिनां प्राधान्येन ज्ञानसाधनं शममाचष्ट इति शमः "यतीनां प्रशमोधर्मोनियमो वनवासिनां । दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम्" इति स्मृतेः 'तत्करोति तदाचष्ट इति' णिचि पचाद्यचि कृते रूपम् शमः सर्वभूतानां शमयितेति वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शमः । विषयसुखेष्वसंगतया शांतः"निष्कलं निष्क्रियं शांतमि"तिश्रुतेः । प्रलये नितरां तत्रैव ति
ष्ठति भूतानीति निष्ठा । समस्ताविद्यानिवृत्तिः शांतिः सा ब्रह्मैव । परमुत्कृष्टमयनं स्थानं पुनरावृत्ति
शंकारहितमिति परायणम् पुल्लिंगपक्षे बहुव्रीहिः ॥ ७५ ॥ सुंदरां तनुं धारयन् शुभांगः । रागद्वेषा
दिनिर्मोक्षलक्षणां शांतिं ददातीति शांतिदः । सर्गादौ सर्वभूतानि ससर्जेति स्रष्टा । कौ भूम्यां मो
दत इति कुमुदः । कोः पृथिव्याःवलनात् संवरणात् कुवलं जलं तस्मिन् शेषोदरे शेत इति कुवले
शयः । "शयवासवासिष्वकालादि"त्यलुक् सप्तम्याः । कुवलस्य बदरीफलस्य मध्ये शेते तक्षकः सो

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ॥ सन्यासकृच्छमः शांतो निष्ठाशांतिः परायणम् ॥ ७५ ॥ शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ७६ ॥

पि तस्य विभूतिरिति वा हरिः कुवलेशयः । कौ भूम्यां संशेरते इति सर्पाणामुदरं कुवलं तस्मिन्
शेषोदरे शेते इति वा कुवलेशयः ५९० गवां वृद्ध्यर्थं गोवर्धनं धृतवानिति गोभ्यो हितो गोहितः ।
गोर्भूमेर्भारावतरणेस्वेच्छयाशरीरग्रहणं कुर्वन् वा गोहितः । गोर्भूम्यादेः पतिर्गोपतिः । रक्षको जग
त इति गोप्ता स्वात्मानं स्वमायया स्वमात्मानं संवृणोतीति वा गोप्ता । सर्वकामाभिवर्षके अक्षि
णी यस्येति वृषभाक्षः वृषो धर्मः स एव वादृष्टिरस्येति वृषभाक्षः । वृषो धर्मः प्रियो यस्यस वृ
षप्रियः । "वा प्रियस्ये"तिपूर्वनिपातविकल्पविधानात् परनिपातः ॥ ७६ ॥ देवासुरसंग्रामान्न निवर्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त इत्यनिवर्ती वृषप्रियत्वाद्धर्मान्ननिवर्तत इति वा अनिवर्ती । स्वभावतोविषयेभ्यो निवृत्त आत्मामनोस्ये ति निवृत्तात्मा । विस्तृतं जगत् संहारसमये सूक्ष्मरूपेण संक्षिपन् संक्षेप्ता । उपात्तस्य परिरक्षणं क्षेमं करोतीति क्षेमकृत् । नामस्मृतिमात्रेण पावयन् शिवः । इति नाम्नां षष्ठं शतं विवृतं ६०० श्रीवत्ससंज्ञं चिह्नमस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः । अस्य वक्षसि श्रीरनपायिनी वसतीति श्रीवासः । अमृतमथने सर्वान् सुरासुरादीन् विहाय श्रीरेनं वरयामासेति श्रीपतिः । श्रीः परा शक्तिः तस्याः पतिरिति वा "परास्य शक्तिर्विविधैव भूयत" इति श्रुतेः । ऋग्यजुःसामलक्षणा श्रीर्येषां तेषां श्रीमतां विरिंच्यादीनां प्रधानइति श्रीमतांवरः

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ७७ ॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥ ७८ ॥

"ऋचः सामानियजूंषि साहिश्रीरमृतासतामि"तिश्रुतेः ॥ ७७ ॥ श्रियं ददाति भक्तानामिति श्रीदः । श्रिय ईशः श्रीशः । श्रीमत्सु नित्यं वसतीति श्रीनिवासः श्रीशब्देन श्रीमंतो लक्ष्यंते । सर्वशक्तिमयेऽस्मिन्नखिलाः श्रियो निधीयंतेइति श्रीनिधिः । कर्मानुरूपेण विविधाः श्रियः सर्वभूतानां भावयतीति श्रीविभावनः। सर्वभूतानां जननीं श्रियं वक्षसि वहन् श्रीधरः६१०स्मरतां स्तुवतामर्चयतां च भक्तानां श्रियंकरोतीति श्रीकरः।अनपायिसुखावाप्तिलक्षणं श्रेयः तच्च परस्यैव रूपमिति श्रेयः । श्रियोऽस्य संतीति श्रीमान् । त्रयाणां लोकानामाश्रयत्वाल्लोकत्रयाश्रयः ॥ ७८ ॥ शोभने पुंडरीकाभे अक्षिणी अस्येति स्वक्षः । शोभनान्यंगानिअस्येति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वंगः । एक एव परमानंद उपाधिभेदाच्छतधा भिद्यत इति शतानंदः "एतस्यैवानंदस्यान्यान्यानिभूतानि मात्रामुपजीवंती"तिश्रुतेः । परमानंदविग्रहो नंदी। ज्योतिर्गणानामीश्वरोज्योतिर्गणेश्वरः "तमेव भांतमनुभाति सर्वं तस्यभासा सर्वमिदंविभाती"तिश्रुतेः "यदादित्यगतंतज" इत्यादिस्मृतेश्च । विजित आत्मा मनोयेन सविजितात्मा ६२० नकेनापि विधेय आत्मा स्वरूपमस्येति अविधेयात्मा । सती अवितथा कीर्तिरस्येति सत्कीर्तिः । करतलामलकवत्सर्वं साक्षात्कृतवतः क्वापि संशयो नास्तीति छिन्नसंशयः ॥ ७९ ॥ सर्वभूतेभ्यः समुद्रिक्तत्वादुदीर्णः । सर्वतः सर्वस्वचैतन्येन पश्यतीति सर्वतश्चक्षुः "विश्वतश्चक्षुरि"ति

स्वक्षःस्वंगःशतानंदोनंदिर्ज्योतिर्गणेश्वरः॥विजितात्माविधेयात्मासत्कीर्तिश्छिन्नसंशयः ७९
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ॥ भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ८०

श्रुतेः । न विद्यतेस्येशइत्यनीशः "नतस्येशः कश्चने"तिश्रुतेः । शश्वद्भवन्नपि न विक्रियांकदाचिदुपैतीति शाश्वतस्थिर इति नामैकं । लंकांप्रतिमार्गमन्वेषमाणः सागरंप्रति भूमौशेते इति भूशयः । स्वेच्छयावतारैर्बहुभिर्भूमिं भूषयन् भूषणः । भूतिर्भवनं सत्ताविभूतिर्वा सर्वविभूतीनां कारणत्वाद्वा भूतिः । ६३० विगतः शोकोस्य परमानंदैकरूपत्वादिति विशोकः । स्मृतिमात्रेणभक्तानां शोकंनाशयतीति शोकनाशनः ॥८०॥ अर्चिष्मंतो यदीयेनार्चिषा चंद्रसूर्यादयः स एव मुख्योर्चिष्मान् । सर्वलोकादिभिर्विरिंच्यादिभिरर्चितइत्यर्चितः । कुंभवदस्मिन्सर्वं प्रतिष्ठितमिति कुंभः । गुणत्रयातीततया विशुद्धआत्मास्येति विशुद्धात्मा । स्मृतिमात्रेण पापानां क्षपणात् विशोधनः । चतुर्व्यूहेष्वनिरुद्धः (चतुर्व्यूहेषु वासुदेवसंकर्षणप्रद्युम्नानिरुद्धे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्वनिरुद्धग्रहणात्)। ननिरुध्यतेशत्रुभिः कदाचिदितिवानिरुद्धः । प्रतिपक्षोस्य न विद्यत इत्यप्रतिरथः । प्रकृष्टंद्युम्नंद्रविणमस्येति प्रद्युम्नः चतुर्व्यूहात्मा ६४० अमितो विक्रमोस्येत्यमितविक्रमः ॥ ८१ ॥ कालनेमि नमसुरं निजघानेति कालनेमिनिहा । गर्वविनाशशत्रूणांकुलानिनिहत्यराजतइतिवीरः विक्रमशालित्वाद्वावीरः शूरवीरविक्रांताविति धातुपाठात् । शूरकुलोद्भवत्वाच्छौरिः । शूरजनानांवासवादीनां शौर्यातिशयेनेष्ट इति शूरजनेश्वरः । त्रयाणां लोकानामंतर्यामितयात्मेतित्रिलोकात्मा त्रयो लोकाअस्मात्परमार्थतो न भिद्यंते इति वा त्रिलोकात्मा । त्रयो लोकास्तदाज्ञप्ताः स्वेषुस्वेषु कर्मसु वर्तत इति त्रिलोकेशः । के

अर्चिष्मानर्चितःकुंभोविशुद्धात्मा विशोधनः ॥ अनिरुद्धोऽप्रतिरथःप्रद्युम्नोमितविक्रमः ८१
कालनेमिनिहावीरःशौरिःशूरजनेश्वरः ॥ त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ८२

शसंज्ञिताः सूर्यादिसंक्रांता अंशवस्तद्वत्तया केशवः "अंशवो ये प्रकाशंतेमम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमा"इति महाभारते । ब्रह्मविष्णुशिवाख्याः शक्तयः केशसंज्ञिताः . तद्वत्तय वा केशवः ।"त्रयःकेशिन"इति श्रुतेः । 'मत्केशो वसुधातले' इति केशशब्दः शक्तिपर्यायत्वेन प्रयुक्तः"कोब्रह्मे ति समाख्यात ईशोहं सर्वदेहिनां।आवां तवांशसंभूतौ तस्मात्केशवनामवानि"ति हरिवंशे। केशिनामानमसुरं हंतवानितिकेशिहा। सहेतुकं संसारं हरतीति हरिः ६५० ॥८२॥ धर्मादिपुरुषार्थचतुष्टयं वांछद्भिः काम्य इति कामःसचासौदेवश्चेति कामदेवः।कामिनां कामान् पालयतीति कामपालः ।पूर्णकामत्वात्कामी। कामोस्यास्तीति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वा "सोकामयते"ति श्रुतेः । अभिरूपतमंदेहंवहन् कांतः द्विपरार्धांते कस्यहिरण्यगर्भस्यब्रह्मणोंतो यस्मा दितिवाकांतः । कृत आगमः श्रुतिस्मृत्यादिलक्षणो येन स कृतागमः । "वेदाः शास्त्राणि विज्ञानमेतत्स र्वंजनार्दना"दिति वक्ष्यति 'श्रुतिस्मृतीममैवाज्ञे' इतिभगवद्वचनात् 'इदं तदीदृगेवेति निर्देष्टुं यन्नशक्य ते' । गुणाद्यतीतत्वाद्रूपमस्येत्यनिर्देश्यवपुः । रोदसी व्याप्य कांतिरभ्यधिकास्थितास्येति विष्णुः 'व्याप्य मेरोदसी पार्थकांतिरभ्यधिका स्थिता । क्रमणाद्व्याप्यहं पार्थ विष्णुरित्यधिसंज्ञित'इति महाभारते । गत्यादि मत्वाद्वीरः "वी गतिव्याप्तिप्रजनकांत्यसनखादनेष्वि"तिधातुपाठात् । व्यापित्वान्नित्यत्वात्सर्वात्मत्वाद्देशत

कामदेवः कामपालः कामी कांतः कृतागमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोनंतो धनंजयः ॥८३॥
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ॥ ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८४ ॥

कालतो वस्तुतश्चापरिच्छिन्नत्वादनंतः "सत्यं ज्ञानमनंतं ब्रह्मे'ति श्रुतेः "गंधर्वाप्सरसःसिद्धाः किंनरोरगचारणाः । नांतं गुणानां गच्छंति तेनांनंतोयमव्यय 'इति विष्णुपुराणवचनाच्चानंतः । यद्दिग्विजये प्रभूतं धनमजयत्तेन धनंजयोऽर्जुनः । "पांडवानां धनंजय" इति भगवद्वचनात् ६६० ॥ ॥ ८३ ॥ " तपोवेदाश्च जातिश्च ज्ञानं च ब्रह्मसंज्ञितं" तेभ्यो हितत्वात्तद्वेदितृत्वाद्वाब्रह्मण्यः । तपआ दीनां कर्तृत्वाद्ब्रह्मकृत् । ब्रह्मात्मना सर्वं सृजतीति ब्रह्मा । बृहत्वाद्बृंहणत्वात्सत्यादिलक्षणं ब्रह्म "स त्यं ज्ञानमनंतं ब्रह्मे"ति श्रुतेः "प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरः । वचसामात्मसंवेद्यं तज्ज्ञानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मसंज्ञितमि"ति विष्णुपुराणे । तपआदीनां विवर्धनात् ब्रह्मविवर्धनः । वेदं वेदार्थं च यथावद्वेत्ति विंदत इति वा ब्रह्मवित् । ब्रह्मात्मना ब्राह्मणात्मना समस्तानां लोकानां प्रवचनं कुर्वन्वेदस्यायमिति ब्राह्मणः । ब्रह्मसंज्ञितास्तच्छेषभूता अस्यसंतीति ब्रह्मी । वेदान् स्वात्मभूतान् जानातीतिब्रह्मज्ञः । ब्राह्मणानां प्रियो ब्राह्मणप्रियः ब्राह्मणाः प्रिया अस्येतिवा "ग्रंतंशपंतं परुषं वदंतं यो ब्राह्मणं न प्रणमेद्यथाहं (भृगुवत्) सपापकृद्ब्रह्मदवाग्निदग्धो वध्यश्च दंड्यश्च न चास्मदीय" इति भगवद्वचनात् "यंदेवं देवकी देवीवसुदेवादजीजनत् । भौमस्यब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणि"रिति च महाभारते ६७०॥८४॥ महांतः क्रमाः पादविक्षेपा अस्येति महाक्रमः "शं नो विष्णुरुरुक्रम" इति श्रुतेः । महज्जग

महाक्रमो महाकर्मा महातेजा महोरगः ॥ महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ८५ ॥

दुत्पत्यादिकर्मास्येति महाकर्मा । यदीयेन तेजसा भास्करादयःस्तेजस्विनस्तन्महत्तेजोस्येतिमहातेजाः 'येनसूर्यस्तपतितेजसेद्ध'इतिश्रुतेः 'यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामक मि'तिस्मृतेश्च क्रौर्यशौर्यादिभिर्महद्भिःसमलंकृतइतिमहातेजाः । महांश्चासावुरगश्चेति महोरगः "सर्पा णामस्मि वासुकिः"इति भगवद्वचनात् । महांश्चासौ क्रतुश्चेति महाक्रतुः । "यथाश्वमेधः क्रतुराडितिम नुवचनात्"सोपि सएवेति" श्रुतेः । महांश्चासौ यज्वा चेति लोकसंग्रहार्थं यज्ञान् निर्वर्तयन् महायज्वा । म हांश्चासौ यज्ञश्चेति महायज्ञः । "यज्ञानां जपयज्ञोस्मी"ति भगवद्वचनात् । महच्चतद्धविश्चेति ब्रह्मात्म नि सर्वं जगत्तदात्मतया हूयत इति महाहविः । महाक्रतुरित्यादयो बहुव्रीहयो वा ॥ ८५ ॥ सर्वैः स्तूयते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नस्तोताकस्यचिदितिस्तव्यः। अतएवस्तवप्रियः ६८० येनस्तूयतेतत्स्तोत्रंगुणसंकीर्तनात्मकं। तद्धविरेवेति स्तुतिःस्तवनक्रिया। स्तोतापि स एव। प्रियो रणो यस्य यतः पंचमहायुधानि नंदकखड्गसहितानि धत्तेसततं लोकरक्षणार्थमतो रणप्रियः। सर्वैः कामैःसकलाभिः शक्तिभिश्च संपन्नइति पूर्णः। न केवलं पूर्ण एव पूरयिता च सर्वेषां संपद्भिः। स्मृतिमात्रेण कल्मषाणि क्षपयतीति पुण्यः। पुण्या कीर्तिरस्य यतः पुण्यमावहत्यस्य कीर्तिर्नृणामिति पुण्यकीर्तिः। आंतरैर्बाह्यैर्व्याधिभिः कर्मजैर्न पीड्यत इति अनामयः॥ ८६॥ मनसोवेग इव वेगोस्य सर्वगतत्वान्मनोजवः ६९० । चतुर्दशविद्यानां बाह्यविद्यासमयानां च प्रणेता प्र

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ८६ ॥ मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ॥ वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८७ ॥

वक्ता चेति तीर्थकरः हयग्रीवरूपेण मधुकैटभौहत्वा विरिंच्याय सर्गादौ सर्वाश्रुतीरन्याश्चविद्या उपदिशन् वेदबाह्याविद्याः सुरवैरिणां बंधनादि चोपदिशति इति पौराणिकाः कथयंति। वसु सुवर्णं रेतोस्येति वसुरेताः। "अप एव ससर्जादौ तासु वीर्यमथासृजत्। तदंडमभवद्धैमं सहस्रांशुसमप्रभमि"ति वचनात् ब्रह्मणःकारणंपरमितिवसुरेताः। वसु धनं प्रकर्षेण ददाति साक्षाद्धनाध्यक्षोयमितरस्तुतत्प्रसादाद्धनाध्यक्ष इति वसुप्रदः। वसु प्रकृष्टं मोक्षाख्यं फलं भक्तेभ्यः प्रददातीति द्वितीयो वसुप्रदः। "विज्ञानमानंदं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मरातेर्दातुः परायणं तिष्ठमानस्य तद्विद" इति श्रुतेः सुरारीणां वसूनि प्रकर्षेणाधः खंडयन वा वसुप्रदः । वसुदेवस्यापत्यं वासुदेवः । वसंतिभूतानि तत्रतेषुवावसतीतिवसुः छादयत्यात्मनः स्वरूपं माययेतिवा वसुः । अविशेषेण सर्वविषयेषु तन्मनो वसतीति वसुः तन्मनोस्येति वसुमनाः। ब्रह्म : हविरिति भगवद्वचनाद्धविः ॥ ८७ ॥ 'अस्ति ब्रह्मेतिचेद्वेदसंतमेनं ततो विदुरि'ति श्रुतेः । ब्रह्मास्तीति ये विदुस्ते संतस्तैः प्राप्य त इति सद्गतिः । सती गतिर्बुद्धिः समुत्कृष्टास्येति वा सद्गतिः । सती कृतिर्जगदुत्पत्त्यादिलक्षणास्य य स्मात्तेन सत्कृतिः ७०० ॥ इति सप्तमं शतं विवृतम् ॥ सजातीयविजातीयस्वगतभेदरहितानुभूतिः सत्ता "ए

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ॥ शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ८८
भूतावासो वासुदेवः सर्वासुनिलयोनलः ॥ दर्पहा दर्पदो दृप्तो दुर्धरोथापराजितः ॥ ८९ ॥

कमेवाद्वितीयमि"ति श्रुतेः स एव परमात्माचिदात्मकोबोधोबहुधाभासमानत्वात्सद्भूतिःनानात्वप्रतीतेर्बाध्यमा नत्वान्नसन्नाप्यसन्श्रौतोवायौक्तिकोवाबाधःप्रपंचस्यविवक्षितः। सतां तत्वविदां परंप्रकृष्टमयनमिति सत्परायणः। हनूमत्प्रमुखाः सैनिकाः शौर्यशालिनो यस्यां सेनायां सा शूरसेना यस्य स शूरसेनः । यदूनां प्रधानत्वा द्यदुश्रेष्ठः । सतां विदुषामाश्रय इति सन्निवासः । शोभना यामुना यमुनासंबंधिनः परिवेष्टारोस्येति सुयामुनः गोपालवेषधरा यमुनापरिवेष्टारः पद्मासनादयः शोभना अस्येति वा सुयामुनः ॥ ८८ ॥ भूतान्यत्राभिमुख्येन वसंतीति भूतावासः । "वसंति त्वयि भूतानि भूतावासस्ततोभवानि"ति हरिवं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शे । जगदाच्छादयति मायया इतिवासुः सएवदेवइतिवासुदेवः । 'छादयामिजगत्सर्वमूत्यासूर्यइवांशुभिरि'तिभगवद्वचनात् । सर्व एवासवः प्राणा जीवात्मके यस्मिन्नाश्रयेनिलीयंते स सर्वासुनिलयः ७१० अलं पर्याप्तिः शक्तिसंपदां नास्य विद्यत इत्यनलः । धर्मविरुद्धे पथि तिष्ठतां दर्पं हंतीति दर्पहा । धर्मवर्त्मनि वर्तमानानां दर्पं गर्वं ददातीति दर्पदः । स्वात्मामृतरसास्वादनात् नित्यं प्रमुदितो दृप्तः । न शक्या धारणा यस्य प्रणिधानादिषु सर्वोपाधिविनिर्मुक्तत्वात्तथापि तत्प्रसादतः कैश्चिद्दुःखेन धार्यते हृदये जन्मांतरसहस्रेषु भावनायोगात्तस्माद्दुर्धरः "क्लेशोधिकतरस्तेषामव्यक्तासक्तवर्त्मनां । अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यत"इति भगवद्वचनात् । नांतरै रागादिभिर्बाह्यैः शत्रुभिः पराजित इत्यपराजितः ॥८९॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ९० ॥
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ॥ लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ॥ ९१॥

विश्वामूर्तिरस्य सर्वात्मकत्वादिति विश्वमूर्तिः । शेषपर्यंकशायिनोस्य महती मूर्तिरिति महामूर्तिः । ज्ञानमयी मूर्तिः स्वेच्छया तैजसी वा दीप्तिरस्येति दीप्तमूर्तिः । कर्मनिबंधना मूर्तिरस्य न विद्यत इति अमूर्तिमान् ७२० । अवतारेषु स्वेच्छया लोकानामुपकारिणी बह्वीर्मूर्तीर्भजत इत्यनेकमूर्तिः । यद्यप्यनेकमूर्तित्वं तथाप्ययमीदृश इति न व्यज्यत इति अव्यक्तः । नानाविकल्पजा मूर्तयः संविदाकृतेः संतीति शतमूर्तिः । यतोविश्वादिमूर्तित्वमत एवं शताननः ॥ ९० ॥ परमार्थतः सजातीयविजातीयस्वगतभेदविमुक्तत्वादेकः "एकमेवाद्वितीयमि"ति श्रुतेः । माययाबहुरूपत्वान्नैकः । "इंद्रो मायाभिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुरूप ईयत"इति श्रुतेः । सोमो यत्राभिषूयते सोध्वरः सवः । कशब्दः सुखवाचकः तेनस्तूयत इति कः "कंब्रह्मे"ति श्रुतेः । सर्वपुरुषार्थरूपत्वाद्ब्रह्मैव विचार्यमिति ब्रह्म किं यच्छब्देन स्वतःसिद्धवस्तूद्देशवाचिनाब्रह्मनिर्दिश्यते इति ब्रह्मयत् "यतो वा इमानि भूतानि जायंत"इति श्रुतेः ७३० तनोतीति ब्रह्म तत् । "ॐतत्सादिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत"इति भगवद्वचनात् । पद्यते गम्यते मुमुक्षुभिरिति पदम् यस्मादुत्कृष्टं नास्ति तदनुत्तमम् । सविशेषणमेकं नाम पदमनुत्तममिति । आधारभूतेस्मिन्त्सकला लोका बध्यंत इति लोकानां बंधुर्लोकबंधुः । लोकानां जनकत्वाज्जनकोपमो बंधुर्नास्तीति वा लोकानां बंधुकृत्यं हिताहितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा लोकबंधुः ।

सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी ॥ वीरहाविषमः शून्यो धृताशीरचलश्चलः ॥ ९२ ॥

लोकैर्नाथ्यते याच्यते तानुपतपति तेभ्य आशास्ते तेषामीष्ट इति वा लोकनाथः । "नाथृ नाधृयाच्ञोपतापैश्वर्याशीष्षु"इति धातुपाठात् । मधुकुले जातत्वान्माधवः। भक्तस्नेहवान् भक्तवत्सलः ॥९१॥ सुवर्णस्य वर्ण इववर्णोस्येति सुवर्णवर्णः । "यदापश्यः पश्यतेरुक्मवर्णं"इति श्रुतेः । हेमेवांगं वपुरस्येति हेमांगः"य एषोंतरादित्यो हिरण्मयः पुरुष"इति श्रुतेः । वराणि शोभनान्यंगान्यस्येति वरांगः। चंदनाह्लादनैरंगैः केयूरैर्भूषित इति चंदनांगदी ७४० धर्मत्राणाय वीरानसुरमुख्यान् हिरण्यकशिपुप्रभृतीन्रागादींश्च हंतीति वीरहा । समो नास्य विद्यते सर्वविलक्षणात्वादिति विषमः । "न त्वत्समोस्त्यभ्यधिकःकुतोन्य"इति भगवद्वचनात् । सर्वविशेषरहितत्वाच्छून्यवच्छून्यः । धृताः विगलिताआशिषःप्रार्थ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ना अस्येति धृताशीः । न स्वरूपान्न सामर्थ्यान्नावज्ञानादिकाद्गुणात् चलनं विद्यतेस्येत्यचलः । वायुरूपेण चलतीति चलः ॥ ९२ ॥ अनात्मवस्तुष्वात्माभिमानो नास्ति स्वसंवेदनाकृतेरित्यमानी । स्वमायया सर्वेषामनात्मनिस्वात्माभिमानंददाति भक्तानांसत्कारंमानंचददाति अधर्मिष्ठानांसत्कारंद्यति खंडयतितत्वविदामनात्मन्यभिमानंद्यतिखंडयतीतिवामानदः । सर्वैर्माननीयः पूजनीयः सर्वेश्वरत्वादिति मान्यः । चतुर्दशानां लोकानामीश्वरत्वाल्लोकस्वामी ७५० त्रिलोकान् धारयतीति त्रिलोकधृक् । शोभना मेधा प्रज्ञास्येति सुमेधाः"नित्यमसिच्प्रजामेधयो"रितिसमासांतोसिच्प्रत्ययः । मेघेध्वरेजायत इति मेघजः ।

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ॥ सुमेधा मेघजो धन्यः सत्यमेधा धराधरः ॥ ९३ ॥ तेजोवृषो द्युतिधरः सर्वशस्त्रभृतांवरः ॥ प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ॥ ९४ ॥

कृतार्थो धन्यः । सत्या अवितथा मेधास्येति सत्यमेधाः । अंशैरशेषैः शेषाद्यैरशेषां धरां धारयन् धराधरः ॥ ९३ ॥ तेजसा भासा सर्वदाद्वादशादित्यरूपेण वर्षणात्तेजोवृषः । द्युतिमंगगतां कांतिं धारयन् द्युतिधरः । सर्वशस्त्रभृतां श्रेष्ठः इति सर्वशस्त्रभृतांवरः । भक्तैरुपहृतं पत्रपुष्पादिकं गृह्णातीति प्रग्रहः । धावतो विषयारण्ये दुर्दांतेंद्रियवाजिनः । तत्प्रसादेनरश्मिनेव बध्नातीति वा प्रग्रहवत्प्रग्रहः । "प्रग्रहो रश्मौ वे"तिपाणिनिवचनात् प्रग्रहशब्दस्य साधुत्वम् ॥ ७६० स्ववशेन सर्वं निगृह्णातीति निग्रहः । विगतमग्रमंतो नाशोस्येति व्यग्रः । भक्तजनानामभीष्टप्रदानेषुव्यग्रइतिवाव्यग्रः । चतुःशृंगो नैकशृंगः"चत्वारिशृंगा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआविवेशे"ति श्रुतेः। निगदे नमंत्रेणाग्रेजायतेइति निशब्दलोपं कृत्वा गदाग्रजः। यद्वा गदो नाम श्रीवासुदेवावरजः तस्मादग्रे जायत इतिवागदाग्रजः ॥ ९४ ॥ चतस्रो मूर्तयो विराट्सूत्रात्मप्राकृततुरीयात्मानोस्येति चतुर्मूर्तिः। सितारक्तापीताकृष्णाइतिचतस्रोमूर्तयोस्येतिवाचतुर्मूर्तिः।चत्वारो बाहवोस्येति चतुर्बाहुरिति नाम वासुदेवे रूढम्।शरीरपुरुषः छंदःपुरुषः वेदपुरुषो महापुरुषः इति इति बह्वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा अस्येति चतुर्व्यूहः चतुर्णामाश्रमाणांवर्णानांचयथोक्तकारिणांगतिश्चतुर्गतिः। रागद्वेषादिरहितत्वाच्चतुरंमनआत्मास्येति मनोबुद्धिरहंकाराचित्ताख्यपुरुषार्थचतुष्टयात्मकत्वाद्वाचतुरात्मा। धर्मार्थकाममोक्षाख्यचतुष्टयं भवत्युत्पद्यते यस्मादिति चतुर्भावः ७७०

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥ चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ९५ ॥
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥ दुर्लभो दुर्गमो दुर्गो दुरावासोदुरारिहा ॥९६ ॥

यथावद्वेत्तिचतुर्णां वेदानां अर्थामिति चतुर्वेदवित्। एकः पादोस्येति एकपात्।"पादोस्यविश्वाभूतानी"ति श्रुतेः। "विष्टभ्याहमिदंकृत्स्नमेकांशेन स्थितो जगदि"तिस्मृतेश्च ॥९५ ॥ संसारचक्रस्य सम्यगावर्तकइति समावर्तः। सर्वत्र वर्तमानत्वान्न निवृत्त आत्मा कुतोपीत्यनिवृत्तात्मा। निवृत्तआत्मामनोविषयेभ्योस्येतिवानिवृत्तात्मा। जेतुं न शक्यत इति दुर्जयः। भयहेतुत्वादस्याज्ञांसूर्यादयोनातिक्रामंतीति दुरतिक्रमः। "भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम" इति मंत्रवर्णात्। महद्भयं वज्रमुद्यतमिति च। दुर्लभया भक्त्यालभ्यत्वाद्दुर्लभः। "जन्मांतरसहस्रेषु तपोज्ञान समाधि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत" इति व्यासवचनात् । "भक्त्या लभ्यस्त्वनन्यये"तिभगवद्वचनाच्च । दुःखेन गम्यते ज्ञायतइति दुर्गमः । अंतरायप्रतिहतैर्दुःखादवाप्यतइति दुर्गः । दुःखेनाव्रास्यते चित्तेयोगिभिः समाधाविति दुरावासः ७८० । दुर्गामिनोदानवादयस्तान् हंतीति दुरारिहा ॥ ९६ ॥ शोभनैरंगैर्ध्येयत्वाच्छुभांगः । लोकानां सारं यत्तद्गृह्णातीति लोकसारंगः । "प्रजापतिर्लोकानभ्यतपदि"तिश्रुतेः । लोकसारः प्रवणः तेन प्रतिपत्तव्य इति वा लोकसारंगः पृषोदरादित्वात्साधुत्वम् । शोभनस्तंतुर्विस्तीर्णः प्रपंचोस्येति सुतंतुः । तमेव तंतुर्वर्धयतिछेदयतीति वा तं

शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ॥ ९७ ॥ उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ॥ अर्को वाजसनः शृंगी जयंतःसर्वविज्जयी ॥ ९८ ॥

तुवर्धनः । इंद्रस्य कर्मैव कर्मास्येतींद्रकर्मा ऐश्वर्यकर्मेत्यर्थः । महांति वियदादीनि भूतानि कर्माणि कार्याण्यस्येति महाकर्मा । कृतमेव न कर्तव्यं किंचिदपि कर्मास्य विद्यत इति कृतकर्मा । धर्मात्मकं कर्म कृतवानिति वा । कृतः वेदात्मकः आगमोनेनेति कृतागमः अस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदइतिश्रुतेः ॥ ९७ उत्कृष्टं भवं जन्म स्वेच्छया भजत इत्युद्भवः । उद्गतमपगतं जन्मास्य सर्वकारणत्वादिति वा उद्भवः । ७९० विश्वातिशायिसौभाग्यशालित्वात्सुंदरः । सुष्ठुउन्दतीतिसुंदः 'उंदीक्लेदन'इतिधातोः पचाद्यच् आर्द्रीभावस्य वाचकः करुणाकर इत्यर्थः । पृषोदरादित्वात्पररूप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वम् । रत्नशब्देन शोभा लक्ष्यते रत्नवत्सुंदरा नाभिरस्येति रत्ननाभः । शोभनं लोचनं नयनं ज्ञानं वास्येति सुलोचनः । ब्रह्मादिभिः पूज्यतमैरर्चनीयत्वादर्कः । वाजमन्नमर्थिनां सनोति ददातीतिवाजसनः । प्रलयांभसि शृंगवान् मत्स्यविशेषरूपः शृंगी । मत्वर्थीयोतिशायने । अरीन् अतिशयेन जयति जयहेतुर्वा जयंतः । सर्व विषयज्ञानमस्येति सर्ववित् । आंतरान् रागादीन् बाह्यान् हिरण्याक्षादींश्च जेतुंशीलमस्येति जयी 'प्रजो रिनिरि'त्यधिकारे "जिदक्षी" त्यादिपाणिनीयवचनादिनिप्रत्ययः । सर्वविच्चासौजयीचेतिसर्वविज्जयीत्येकं नाम ॥ ९८ ॥ बिंदवोवयवाः सुवर्णसदृशा अस्येति सुवर्णबिंदुः । "आप्रनखात्सर्व एव सुवर्ण'इति श्रुतेः । शोभनोव र्णोऽक्षरं बिंदुश्च यस्मिन्मंत्रात्मा वा सुवर्णबिंदुः ८०० । नाम्नामष्टमं शतं विवृतम् ॥ ॥ सत्तानलोनेकमूर्ति

सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ महाह्रदो महागर्तोमहाभूतो महानिधिः ॥ ९९ ॥
कुमुदःकुंदरः कुंदःपर्जन्यः पवनोनिलः ॥ अमृताशोऽमृतवपुः सर्वज्ञःसर्वतोमुखः ॥ १०० ॥

स्तद्वीरहात्रिलोकधृन्निग्रहश्चतुर्वेदवित्दुरारिहासुंदरः ॥ ॥ रागद्वेषादिभिः शब्दादिविषयैश्च त्रिदशादिभि श्च न क्षुभ्यत इत्यक्षोभ्यः । सर्वेषां वागीश्वराणांब्रह्मादीनामपीश्वरः सर्ववागीश्वरेश्वरः । अवगाह्य सदानं दं विश्रम्यसुखमासते योगिन इति महाह्रद इव महाह्रदः । गर्तवदस्य माया महती दुरत्ययेति महागर्तः । "मम माया दुरत्यये'ति भगवद्वचनात् । यद्वा गर्तशब्दो रथपर्यायइति नैरुक्तैरुक्तस्तस्मान्महारथो महागर्तः महारथत्वमस्य प्रसिद्धम् भारतादिषु । कालत्रयानवच्छिन्नस्वरूपत्वान्महाभूतः । सर्वभूतानि यस्मिन्निधी यंते महांश्चासौ निधिश्चेति महानिधिः ॥ ९९ ॥ कुं धरणीं भारावतारणं कुर्वन् मोदयतीति कुमुदः । मुदि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रत्र णिजर्थः । कुंदपुष्पतुल्यानि शुद्धानि धर्मानुबंधीनि फलानि राति ददातीतिकुंदरः । कुंदपुष्पतुल्यानि शुद्धानि फलानिलात्यादत्तइति वाकुंदरः । रलयोर्वृत्त्येकत्वस्मरणात् ।"कुं धरां दारयामास हिरण्याक्षजिघांसया । वाराहं रूपमास्थाये'तिवा कुंदरः कुंदोपमसुंदरांगत्वात्स्वच्छ स्फटिकवन्निर्मलः कुंदः । कुं पृथ्वीं कश्यपायादादितिवा कुंदः ।"सर्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान् । तस्मिन्यज्ञे महादाने दक्षिणां मृगुनंदनः । मारीचाय ददौ प्रीतः काश्यपाय वसुंधरामि"ति हरिवंशे । कुंपृथ्वींद्यति खंडयतीति वा कुंदः । कुशब्देन पृथ्वीश्वरा लक्ष्यंते "निःक्षत्रियां यश्च चकारमेदिनीमनेकशो बाहुवनंतथाच्छिनत् । यः कार्तवीर्यस्य सभार्गवोत्तमोयमास्तुमांगल्यविवर्धनोहरिः" इति विष्णुधर्मे । पर्जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्वान्कामानभिवर्षतीति वापर्जन्यः ८१० स्मृतिमात्रेण पुनातीति पवनः । इलति प्रेरणं करोतीति इलःतद्रहि

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥न्यग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः॥१०१॥

तत्वादनिलः इलति स्वपिति इत्यङ्ग इलस्तद्विपरीतः नित्यप्रबुद्धस्वरूपत्वादितिवाऽनिलः अथवानिलेर्गह नार्थात्कप्रत्ययांतरूपम् । नगहनोनिल इति वा । स्वात्मानंदामृतमश्नातीत्यमृताशः । मथितममृतं सुरान् पाययित्वास्वयं चाश्नातीति वाऽमृताशः । अमृताअनश्वराः अविनश्वरफलत्वादाशा वांछास्येतिवा अमृताशः । मृतं मरणं तद्रहितं वपुरस्येत्यमृतवपुः । सर्वं जानातीति सर्वज्ञः ।"यःसर्वज्ञः सर्वविदि'तिश्रुतेः ।"सर्वतोक्षिशिरोमुखमि'ति भगवद्वचनात्सर्वतोमुखः ॥ १०० ॥ पत्रपुष्पफलादिभिर्भक्तिमात्रसमर्पितैः सुखेन लभ्यत इति सुलभः । "पत्रेषु पुष्पेषु फलेषुतोयेष्वक्रीतलभ्येषुसदैवसत्सु । भक्तैकलभ्ये पुरुषे पुराणे मुक्तै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथंनक्रियतेप्रयत्न"इति महाभारते शोभनं व्रतं नियतो भुंक्ते भोजनान्निवर्तत इति वा सुव्रतः । अनन्याधा नसिद्धित्वात्सिद्धः । सुरशत्रव एवास्य शत्रवस्तान् जयतीति शत्रुजित् ८२० सुरशत्रूणांतापनः शत्रु तापनः । न्यक् अवाक् रोहति सर्वेषामुपरि वर्तत इति न्यग्रोधः । पृषोदरादित्वाद्धकारस्य धकारादेशः सर्वाणि भूतानि न्यक्कृत्य निजमायां वृणोति निरुणद्धीति वा न्यग्रोधः । अंबरादुद्गतः कारणत्वेनेत्यु दुंबरः । पृषोदरादित्वादेवोकारादेशः । यद्वोदुंबरमन्नाद्यंतेनतदात्मनाविश्वंपोषयन्नुदुंबरः"ऊर्ग्वाअन्नाद्य मुदुंबरमि"तिश्रुतेः । श्वोपि न स्थातेत्यश्वत्थः पृषोदरादित्वादेव सकारस्यतकारादेशः ।"ऊर्ध्वमूलोवाक्शाखए षोश्वत्थः सनातन" इतिश्रुतेः "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययमि"तिस्मृतेश्च । चाणूरनामानमां

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥ अमूर्तिनरघोर्चित्योभयकृद्भयनाशनः ॥१०२॥

घं निषूदवानिति चाणूरांध्रनिषूदनः ॥ १०१ ॥ सहस्राणि अनंतानि अर्चींषि यस्यससहस्रार्चिः । "दिवि सूर्यसहस्रस्यभवेद्युगपदुत्थिता । यदिभाः सदृशीसास्याद्भासस्तस्यमहात्मन"इति गीतावचनात् । स प्तजिह्वाअस्य संतीति सप्तजिह्वः अग्निरूपी । "कालीकरालीचमनोजवाच सुलोहिता या च सुधूम्रव र्णा । स्फुलिंगिनीविश्वरुचिश्च देवीलेलायमाना इति सप्तजिह्वा" इतिश्रुतेः । सप्त एधांसि दीप्तयोस्येति सप्तैधा अग्निः । "सप्तते अग्ने समिधःसप्तजिह्वा" इतिमंत्रवर्णात् । सप्ताश्वा वाहनान्यस्येति । सप्तवाहनः सप्तनामैकोऽश्वोवाहनमस्येति । सप्तवाहनः "एको अश्वो वहति सप्तनामे" ति श्रुतेः । मूर्तिघनरूपधारणं समर्थं चराचरलक्षणं । "ताभ्योभितप्ताभ्योमूर्तिरजायते"तिश्रुतेःतद्रहितइत्यमूर्तिः अथवा देहसंस्थानलक्षमूर्छिता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गावयवा मूर्तिस्तद्रहितइत्यमूर्तिः ८३० अघं दुःखंपापंच यस्य न विद्यत इत्यनघः। प्रमात्रादिसाक्षित्वेनसर्वप्रमाणागोचरत्वादचिंत्यः । अयमीदृश इति विश्वप्रपंचविलक्षणत्वेन चिंतयितुमशक्यत्वाद्वाऽचिंत्यः । असन्मार्गवर्तिनां भयंकरोति भक्तानां भयं कृंततीतिवा भयकृत् । वर्णाश्रमाचारवतां भयं नाशयतीति भयनाशनः "वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णोराराध्यते पंथा नान्यस्तत्तोषकारक" इति पराशरवचनात् । तैराराधितत्वाद्भयंनाशयतीतिभयनाशनः ॥ १०२ ॥ सौक्ष्म्यातिशयशालित्वादणुः । "एषोणुरात्मा चेतसा वेदितव्य" इतिश्रुतेः । बृहत्वाद्बृंहणत्वाच्चब्रह्मबृहत् । "महतोमहीयानि" तिश्रुतेः । अस्थूलमित्यादिनाद्रव्यप्रतिषेधात्कृशः । स्थूल इत्युपचर्यते सर्वात्मत्वात् । सत्त्वरजस्त

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ १०३ ॥

मसां सृष्टिस्थितिलयकर्मस्वधिष्ठातृत्वाद्गुणभृत् । परमार्थतो गुणाभावात् निर्गुणः "केवलोनिर्गुणश्चे" तिश्रुतेः ८४० । शब्दादिगुणरहितत्वान्निरतिशयसूक्ष्मत्वान्नित्यशुद्धसर्वगतत्वादिप्रतिबंधकंकर्मजातं तर्कतोपि वक्तुं न शक्यमतएव महान् । अशब्दास्पर्शश्चमहानशुचिरित्यापस्तंबस्मरणात् पृथिव्यादीनां धारकाणामपि धारकत्वान्नकेनाचिद्धियतइति अधृतः । यद्येवमयंकेन धार्यत इत्याशंक्याह । स्वेनैव आत्मना धार्यत इति स्वधृतः । सभगवः कस्मिन्प्रतिष्ठित इति स्वमहिम्नीति श्रुतेः । पद्मोदरदलताम्रमभिरूपतममस्यास्यमिति । स्वास्यः वेदार्थको महान् शब्दराशिः तस्य मुखान्निर्गतः पुरुषार्थोपदे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शार्थमिति वा स्वास्यः । "अस्य महतो भूतस्ये"त्यादिश्रुतेः अन्यस्य वंशिनो वंशः पाश्चात्यः पाश्चात्योमूलपुरुषादर्वाग्वंशइतिसूचितं अस्य वंशः प्रपंचः ससर्वंशात्प्रागेवनपाश्चात्यइति प्राग्वंशः । वंश प्रपंचं वर्धयन् वा वंशवर्धनः ॥ १०३ ॥ अनंतादिरूपेण भुवो भारं बिभ्रद्भारभृत् । देवादिभिरयमेव परत्वेन कथितः । सर्वैर्वेदैः कथितइति वा कथितः "सर्वेवेदायत्पदमामनंति । वेदैश्चसर्वैरहमेववेद्यः" "वेदे रामायणे चैवपुराणेभारतेतथा ॥ आदौ मध्ये तथा चांते विष्णुः सर्वत्र गीयत" इतिस्मृत्यादिव चनेभ्यः । "सोध्वनः पारमाप्नोतितद्विष्णोः परमंपदम्'इत्याद्युक्तं किं तदध्वनो विष्णोर्व्यापनशीलस्य पारं कथितं परमं पदं विष्णुसतत्वमित्याकांक्षायामिंद्रियादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते "इंद्रि

भारभृत् कथितो योगी योगीशः सर्वकामदः॥आश्रमः श्रमणः क्षामः सुपर्णोवायुवाहनः॥१०४॥

येभ्यः परा ह्यर्था" इत्यारभ्य "पुरुषान्नपरं किंचित्सा काष्ठा सा परागति"रित्यंतेन यः कथितः सः योगो ज्ञानं तेनैव गम्यत्वात् योगी । योगः समाधिः सहि स्वात्मनि सर्वदा समाधत्ते स्वमा त्मानं तेन वा योगी । अन्ये योगिनो योगांतरायैर्हन्यंते तेन स्वरूपात् प्रमाद्यंति अयं तु तद्रहि तत्वात्तेषामीश इति योगीशः । ८५० सर्वान् कामान् सदा ददातीति सर्वकामदः । "फलवत उप पत्तेः" इति भगवता व्यासेनाभिहितत्वात् । आश्रमवतां सर्वेषां संसारारण्ये भ्रमतां विश्रामस्थान त्वादाश्रमः । अविवेकिनः सर्वान् संतापयतीति श्रमणः क्षामाः क्षीणाः सर्वाः प्रजाः करोतीति क्षामः तत्करोति तदाचष्ट इति णिचि पचाद्यचि कृते संपन्नः क्षाम इति । शोभनानि पर्णानि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

छंदांसि संसारतरुरूपेणास्येति सुपर्णः "छंदांसि यस्य पर्णानी" ति भगवद्वचनात् । वायुर्वहति यद्भीत्या भूतानीति स वायुवाहनः । "भीषास्माद्वातः पवत" इति श्रुतेः ॥ १०४ ॥ श्री रामरूपेणधनुर्धारयामासेति धनुर्धरः । स एव दाशरथिः धनुर्वेदंवेत्तीति धनुर्वेदः । दमनं दमयतां दंडः । "दंडो दमयतामस्मी" ति भगवद्वचनात् । वैवस्वतनरेंद्रादिरूपेण प्रजा दमयतीति दमयिता ८६० । दम्येषु दंडकार्यफलं तच्च स एवेतिदमः । शत्रुभिर्न पराजित इत्यपराजितः । सर्वकर्मसु समर्थ इति वा सर्वसहः । सर्वान् शत्रून् सहत इतिवा सर्वसहः । सर्वान् स्वेषु स्वेषु कृत्येषु व्यवस्थापयतीति नियंता । न नि

धनुर्धरो धनुर्वेदो दंडो दमयिता दमः ॥ अपराजितः सर्वसहो नियंता नियमो यमः ॥ १०५ ॥ सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ॥ अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्धनः ॥ १०६॥

यमो नियतिस्तस्य विद्यत इत्यनियमः । सर्वनियंतुर्नियंत्रंतरामावाद्यनास्यविद्यते यमो मृत्युरित्ययमः । अथवा यमनियमौ योगांगौ तद्व्रतत्वात्स एव नियमो यमः ॥ १०५ ॥ शौर्यादिकं सत्त्वमस्येति सत्त्ववान् । सत्त्वे गुणे प्राधान्येन स्थित इति सात्त्विकः । सत्सु साधुत्वात्सत्यः । सत्ये यथाभूतार्थकथने धर्मेच चोदनालक्षणे प्रकर्षेण नियत इति सत्यधर्मपरायणः ८७० । अभिप्रेयते पुरुषार्थकांक्षिभिरा भिमुख्येन प्रलयेस्मिन्प्रेति जगदिति वाभिप्रायः । प्रियाणि इष्टान्यर्हतीति प्रियार्हः "यद्यदिष्टतमं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोके यच्चास्य दयितं गृहे । तत्तद्गुणवते देयं तदेवाक्षयमिच्छते"ति स्मरणात् स्वाग तासनप्रशंसार्घ्यपाद्यस्तुतिनमस्कारादिभिः पूजासाधनैः पूजनीय इत्यर्हः । न केवलं प्रियार्ह एव स्तुत्यादिभिर्भजतां प्रियंकरोतीति प्रियकृत् । तेषामेव प्रीतिं वर्धयतीति प्रीतिवर्धनः ॥ १०६ ॥ वि हायसंआकाशंविहाय गतिराश्रयोस्येति विहायसगतिः । विष्णुपदमादित्योवा स्वयमेव द्योतत इति ज्योतिः "नारायणः परंज्योतिरि"ति मंत्रवर्णात् । शोभना हविर्दीप्तिरिच्छा वास्येति सुरुचिः । समस्तदेवतो द्देशेन प्रवृत्तेष्वपि कर्मसु हुतं भुंक्ते भुनक्तीति वा हुतभुक् । स सर्वत्र वर्तमानः त्रयाणां लोकानां विभुत्वाद्विभुः ८८० रसानादत्त इति रविरादित्यात्मा । विविधं रोचत इति विरोचनः । सूते श्रियमि

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनः सूर्यः सविता रविलोचनः॥७॥
अनंतो हुतभुग्भोक्ता सुखदो नैकदोग्रजः । अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥८॥

ति सूर्योग्निर्वासूतेःसुवतेर्वासूयेशब्दोनिपात्यते "राजसूयसूर्य"इति पाणिनिवचनात् । सर्वस्य जगतः प्रस विता सविता "रसानां चतथाऽऽदानाद्रविरित्यभिधीयते । प्रजानां त्वंप्रसवनात् सवितेति निगद्यस" इति विष्णुधर्मोत्तरे । रविर्लोचनं चक्षुरस्येति रविलोचनः । "अग्निर्मूर्धा चक्षुषी चंद्रसूर्यावि" ति श्रुतेः ॥ १०७ ॥ नित्यत्वात्सर्वगतत्वात् देशकालपरिच्छेदाभावादनंतः । शेषरूपो वा । हुतं भुनक्तीति हुतभुक् । प्रकृतिं भोग्यां अचेतनां भुंक्त इति भोक्ता । जगत्पालयतीति वा भो क्ता । भक्तानां सुखं मोक्षलक्षणं ददाति असुखं खंडयतीति वासुखदः । धर्मगुप्तये असकृज्जायमान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वादनैकजः ८९० अग्रे जायत इत्यग्रजः हिरण्यगर्भः ॥ "हिरण्यगर्भः समवर्तताग्रे" इत्यादिश्रुतेः । आप्तसर्वकामत्वात्प्राप्तिहेत्वभावान्निर्वेदोऽस्य नास्तीति अनिर्विण्णः । साधून्सत आभिमुख्येन मृष्यते क्षमत इति सदामर्षी । तमनाधारमाधारमधिष्ठायत्रिलोकास्तिष्ठंतीति लोकाधिष्ठानं ब्रह्म । "श्रवणायापिबहुभिर्योनलभ्यः । शृण्वंतोपिबहवोयंनविद्युः । आश्चर्योवक्ताकुशलोस्यलब्धाआश्चर्योज्ञाताकुशलानुशिष्ट"इति श्रुतेः । "आश्चर्यवत्पश्यति कश्चिदेनं"इतिभगवद्वचनाच्च स्वरूपशक्तिव्यापारकार्यं अद्भुतत्वाद्वाद्भुतः ॥ ॥ १०८ ॥ सनादितिनिपातः चिरार्थवचनःकालश्चपरस्यैवेति विकल्पनाकापि । "परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज । व्यक्ताव्यक्ततथैवान्ये रूपे कालस्तथापरमि"ति विष्णुपुराणे । सर्वकारणत्वाद्वि

सनात्सनातनतमः कपिलः कपिरव्ययः ॥ स्वस्तिदः स्वस्तिकृत्स्वस्तिस्वस्तिभुक् स्वस्तिदक्षिणः ॥ १० ९ ॥

रिंच्यादीनामपि सनातनानामतिशयेन सनातनत्वात्सनातनतमः । वडवानलस्य कपिलो वर्ण इव तद्रूपी कपिलः । कं जलं रश्मिभिः पिबन् कपिः सूर्योकपिर्वराहो वा । "कपिर्वराहः श्रेष्ठश्चे"ति भगवद्वचनात् । अप्यये प्रलयेस्मिन्नपियंतिजगंतीत्यप्ययः । ९०० । इतिनाम्नां नवमं शतं विवृतं ॥ ॥ भक्तानां स्वस्ति मंगलं ददातीति स्वस्तिदः । तदेव करोतीति स्वस्तिकृत् । मंगलं स्वरूपमात्मीयं परमानंदलक्षणं स्वस्ति तदेव भुंक्त इति स्वस्तिभुक् । भक्तानां मंगलं स्वस्ति भुनक्तीति वा स्वस्तिभुक् । स्वस्तिरूपेण दक्षते वर्धते स्वस्ति विधातुं समर्थ इति वा स्वस्तिदक्षिणः अथवा दक्षिणशब्दः आशुकारि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णि वर्तते । शीघ्रं स्वस्ति दातुं अयमेव समर्थ इति "स्मरणादेव कृष्णस्य सिध्यंति सर्वसिद्धयः । स्मृतेः सकलकल्याणभाजनं यत्र जायते । पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् । स्मरणादेव कृष्णस्य पापसंघातपंजरम् । शतधा भेदमायाति गिरिर्वज्रहतोयथा" । इत्यादिवचनेभ्यः ॥ १०९ ॥ कर्मरौद्रं रागश्चरौद्रःपापंचरौद्रंएतत्त्रयंरौद्रमस्यनास्ति अवाप्तसर्वकामत्वेन रागद्वेषादेरभावादरौद्रः । शेषरूपभाङ्कुंडली । यद्वा सांख्ययोगात्मके कुंडले मकराकारे अस्य स्त इति कुंडली सहस्रांशुमंडलोपमकुंडलधारणाद्वाकुंडली । समस्तलोकरक्षार्थमनस्तत्त्वात्मकंसुदर्शनाख्यंचक्रंधतइतिचक्री "चलत्स्वरूपमत्यंतजवेनांतरितानिलम् । चक्रस्वरूपंचमनोधत्तेविष्णुःकरेस्थितमि"तिविष्णुपुराणे । विक्रमः पादविक्षेपः शौर्यं वा द्वयं चा

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः ॥ शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ११० ॥

शेषरूपेभ्यो विलक्षणमस्येति विक्रमी । श्रुतिस्मृतिलक्षणमूर्जितं शासनमस्येति ऊर्जितशासनः । "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते । आज्ञाछेदी मम द्वेषी मद्भक्तोपिन वैष्णवः" इति भगवद्वचनात् ९१० शब्दप्रवृत्तिहेतूनां जात्यादीनामसंभवात् शब्देन वक्तुमशक्यत्वाच्छब्दातिगः । "यतो वाचो निवर्तंते अप्राप्य मनसा सह । नशब्दगोचरैर्यस्य योगिध्येयं परं पदमि"त्यादिश्रुतिस्मृतिभ्यः । सर्वे वेदाः तात्पर्येण तमेव वदंतीति शब्दसहः "सर्वे वेदा यत्पदमामनंति । वेदेश्च सर्वैरहमेव वेद्य" इत्यादिश्रुतिस्मृतिभ्यः । तापत्रयाभितप्तानां विश्रमस्थानत्वाच्छिशिरः । संसारिणामात्मांशर्वरीवच्छ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वैरी ज्ञानिनां पुनःसंसारः शर्वरी तामुभयेषां करोतीति शर्वरीकरः। "या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरि"ति भगवद्वचनात् ॥ १० ॥ क्रौर्यं नाममनोधर्मः कोपजः आंतरःसंतापः साभिनिवेशः अवाप्तसर्वकामत्वात्कामाभावादेव क्रौर्याभावः तस्मात्क्रौर्यमस्यनास्तीत्यक्रूरः । कर्मणा मनसा वाचा वपुषा चशोभनत्वात्पेशलः। प्रवृद्धशक्तिः शीघ्रकारी समर्थ इति दक्षविशेषणत्रयं चैतत् परमेश्वरे अस्मान्नियतामिति दक्षः । दक्षिणशब्दस्यापि दक्ष एवार्थः । पुनरुक्तिभेदो नास्ति शब्दभेदात् । अथवा दक्षते गच्छति हिनस्तीति वा दाक्षिणः "दक्षगतिहिंसनयोरि"तिधातुपाठात् । क्षमावतां योगिनां पृथिव्यादीनां चभारधारकानां श्रेष्ठ इति

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ॥ विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥११॥
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः संतो जीवनः पर्यवस्थितः॥१२॥

क्षमिणांवरः । "क्षमया पृथिवीसम"-इति वाल्मीकिवचनात् ब्रह्मांडमखिलं वहन् पृथिवीविभारणनार्दित इति पृथिव्या अपि वरोवाक्षमिणांवरः क्षमिणः शक्ताः अयं तु सर्वशक्तिमत्त्वात्सकलाः क्रियाः कर्तुं क्षम इति क्षमिणांवरः । निरस्तातिशयं ज्ञानं सर्वदा सर्वगोचरमस्यास्ति नेतरेषामिति विद्वत्तमः । वीतं विगतं भयं सांसारिकं संसारलक्षणमस्येति वीतभयः सर्वेश्वरत्वान्नित्यमुक्तत्वाच्च। पुण्यं पुण्यकरं श्रवणं कीर्तनं चास्येति पुण्यश्रवणकीर्तनः । "य इदं शृणुयान्नित्यमि"ति श्रवणफलवचनात् ॥ १११ ॥ संसारसागरादुत्तारयतीत्युत्तारणः । दुष्कृतिं पापसंज्ञितां हंतीति दुष्कृतिहा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येपापकारिणस्तान्हंतीतिवादुष्कृतिहा । स्मरणादिकुर्वतां सर्वेषां पुण्यं करोतीति पुण्यरूप त्वात्पुण्य सर्वेषां श्रुतिस्मृतिलक्षणया वाचा पुण्यमाचष्ट इति वा पुण्यः । भाविनोर्थस्य सूचकान् दुःस्वप्नान् नाशयतीति ध्यातःस्तुतः कीर्तितश्चेति दुःस्वप्ननाशनः । विविधा संसारिणां गतीर्मुक्तिप्रदानेन हंतीति वीरहा । सत्त्वगुणमधिष्ठाय जगत्त्रयं रक्षयन् रक्षणः । नंद्यादित्वात्कर्तरिल्युट् । सन्मार्गेव र्तिनः संतः तद्रूपेण विद्याविनयवृद्धये स एव वर्तत इति संतः । सर्वाः प्रजाः प्राणरूपेण जीवयन्जीवनः ९३० । परितः सर्वतो विश्वं व्याप्य व्यवस्थित इति पर्यवस्थितः ॥ ११२ ॥ अनंतादिरूपे

अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ ॥ १३ ॥ अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १४ ॥

णवा विश्वप्रपंचरूपेणवावस्थितश्चेत्यनंतरूपः । अनंता अपरिमिता श्रीः पराशक्तिरस्येति अनंतश्रीः । "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः । मन्युः क्रोधो जितो येन स जितमन्युः । भयं संसारजं पुंसामपघ्नन् भयापहः । न्यायसमवेतश्चतुरश्चतुरस्रः पुंसां कर्मानुरूपं फलं प्रयच्छतीति । आत्माआर्चिःस्वरूपं चित्तं वा गभीरं परिच्छेत्तुमशक्यमस्येति गभीरात्मा । विविधानि फलानि अधिकारि भ्यो विशेषेण दिशतीति विदिशः । विविधामाज्ञां शक्रादीनां कुर्वन् व्यादिशः । समस्तानांकर्मिणां कर्मणांफलानिदिशन्वेदात्मनेति दिशः ॥ ११३ ॥ आदिः कारणमस्य न विद्यतइत्यनादिःसर्वकारणत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूतानामाधारोभूर्भुवः सर्वभूतानामाश्रयत्वेनप्रसिद्धायाभूम्याभुवोपिभूरितिभूर्भुवः। अथवा न केवलमसौभूभुवोल क्ष्मीः शोभा चेति भूर्भुवोलक्ष्मीः । अथवा भूर्भूलोकः भुवोभुवर्लोकः तयोः लक्ष्मीरात्मविद्या । "आत्मविद्या च देवि त्वमि"ति श्रीस्तुतौ । भूम्यंतरिक्षयोः शोभेति वा भूर्भुवोलक्ष्मीः। शोभ ना विविधा ईरा गतयो यस्य स सुवीरः शोभनं विविधं ईरणमस्येति वा सुवीरः । रुचिरे कल्याणे अंगदे अस्येति रुचिरांगदः । जंतून् जनयन् जननः ल्युटो बहुलग्रहणात्कर्तरिल्युट्। जनस्य जनिमतो जन्म उद्भवस्तस्यादिर्मूलकारणमिति जनजन्मादिः । भयहेतुत्वाद्भीमः । "भीमाद योपादान" इति पाणिनिवचनात् । "महद्भयं वज्रमुद्यतमिति"मंत्रवर्णात् । असुरादीनां भयहेतुः

आधारनिलयो धाता पुष्पहासः प्रजागरः॥ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥१९॥

पराक्रमोस्यावतारेष्विति भीमपराक्रमः ॥ ११४ ॥ पृथिव्यादीनां पंचभूतानामाधाराणामाधारत्वादाधार निलयः । स्वात्मना धृतस्यान्यो धाता नास्तीत्यधाता । नद्यृतश्चेति समासांतविधेरनित्य इ ति कप्रत्ययाभावः । संहारसमये सर्वप्रजा धारयति धयति पिबतीति वा धाता । धेट्पाने इति धातुः। ९५० । मुकुलात्मना स्थितानां पुष्पाणां हासवत् प्रपंचरूपेण विकासोस्येति पुष्पहासः। नित्यप्रबुद्धरूपत्वात्प्रकर्षेण जागर्तीति प्रजागरः । सर्वेषामुपरि तिष्ठन् ऊर्ध्वगः । सतां कर्माणि स त्पथेनाचरत्येष इति सत्पथाचारः। मृतान् परिक्षित्प्रभृतीन् जीवयन् इति प्राणदः। प्रणवो नाम परमात्मनो वाचक ओंकारः तदभेदोपचारेणायं प्रणवः । पणतिव्यवहारार्थस्तंकुर्वन्इतिपणः पणव्यवहारेतिधातु:

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदास्ते"ति श्रुतेः । पुण्यानि कर्माणि फलैः संगृह्याधिकारिभ्यः प्रयच्छन् तल्लक्षणयेति वा पणः ॥ ११५ ॥ प्रमितिः संवित्स्वयंप्रमा प्रमाणं । "प्रज्ञानं ब्रह्मे"ति श्रुतेः । "ज्ञानस्वरूपमत्यंतं निर्मलं परमार्थतः । तदेवार्थस्वरूपेण भ्रांतिदर्शनतःस्थितमिति" विष्णुपुराणे । प्राणा इंद्रियाणि यत्र जीवे निलीयंते तत्परतंत्रत्वाद्देहस्य धारकाः प्राणापानादयो वा तस्मिन्प्रविलीयंते प्राणितीति प्राणो जीवः परे पुंसि निलीयत इति वा प्राणान् जीवांश्चात्मनि संहरंस्तेषामाश्रयइति वा प्राणनिलयः ९६० । पोषयन्नन्नरूपेणप्राणानिति । प्राणभृत् । प्राणिनो जीवयन् प्राणाख्यैःपवनैरिति प्राणजीवनः । "न प्राणेन नापानेन

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ॥ तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १६ ॥

मर्त्यो जीवति कश्चन । इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति मंत्रवर्णात् । तथ्यममृतं सत्यं परमार्थसत्तत्वमित्येते एकार्थवाचिनः परमार्थसतो ब्रह्मणो वाचकाः शब्दाः इतितत्वं तत्त्वं स्वरूपं यथावद्वेत्तीति तत्त्ववित् । एकश्चासावात्मा चेत्येकात्मा । "आत्मा वा इदमेक एवाग्र आसीदि"ति श्रुतेः । "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य संततो भावस्तस्मादात्मेति गीयते" इति स्मृतेश्च । जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकारास्तानतीत्य गच्छतीति जन्ममृत्युजरातिग इति "न जायते म्रियते वा विपश्चिदि"ति मंत्रवर्णात् ॥ ११६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूर्भुवः स्वःसमाख्याभि त्रीणि व्याहृतिरूपाणि त्रयीसाराणि बह्वृचा आहुः तैर्होमादिना जगत्त्रयं तरते ध्रुवते चेति भूर्भुवःस्वस्तरुः । "अग्नौ न्यस्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा"इति मनुवचनात् । अथवा भूर्भुवःस्वस्तरुः समाख्योलोकत्रयसंसारवृक्षो भूर्भुवःस्वस्तरुः भूर्भुवस्वःसमाख्यंलोकत्रयंवृक्षवद्व्याप्यातिष्ठतीतिवाभूर्भुवःस्वःस्तरुः । संसारसागरात्तारयंस्तारः । प्रणवो वा । सर्वस्य लोकस्य जनक इति सपिता । पितामहस्य ब्रह्मणोपि पितेति प्रपितामहः । यज्ञात्मना यज्ञः । ९७० । यज्ञानां पाता स्वामी वा यज्ञपतिः । "अहं

भूर्भुवःस्वस्तरुस्तारः सपिता प्रपितामहः ॥ यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ॥ १७ ॥

हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे"ति भगवद्वचनात् । यजमानात्मना तिष्ठन् यज्वा । यज्ञा अंगान्यस्येति यज्ञांगोवराहमूर्तिः । "वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः । अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः । अहोरात्रेक्षणो दिव्यो वेदांतश्रुतिभूषणः । आज्यनासः स्रुवतुंडः सामघोषस्वनो महान् । धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्क्रियः । प्रायश्चित्तनखो घोरः पशुजानुर्महाभुजः । उद्गात्रंत्रो होमलिंगः फलबीजमहौषधिः । वाय्वंतरात्मा मंत्रस्फिक् विकृतः सोमशोणितः । वेदीस्कंधो हविर्गंधो हव्यकव्यास्थिवेगवान् । प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरर्चितः । दक्षिणा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हृदयो योगी महासत्रमयो महान् । उपाकर्मेष्टिऋचकःप्रवर्ग्यावर्तभूषणः । नानाछंदोगतिपथो गुह्योप निषदासनः । छायापत्नी सहायो वै मेरुशृंग इवोच्छ्रित"इति हरिवंशे । फलहेतुभूतान्यज्ञान् वाह यतीति यज्ञवाहनः ॥ ११७ ॥ यज्ञं बिभर्तीति पाति वा यज्ञभृत् । जगदादौ तदंते च यज्ञं करोतीति कृंतति वा यज्ञकृत् । यज्ञानां तत्समाराध्यात्मनांप्रधानंतत्समवायानांशेषीति यज्ञी । यज्ञं भुंक्ते भुनक्तीति वा यज्ञभुक् । यज्ञसाधनं तत्प्राप्ताविति यज्ञसाधनः । यज्ञस्यांते फलप्राप्तिं कुर्वन् यज्ञांतकृत् वैष्णव्यृक्शंसनेनपूर्णाहुत्यापूर्णंकृत्वा यज्ञसमाप्तिं करोतीति वा यज्ञांतकृत् ९८० य

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ॥ यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ ११८ ॥
आत्मयोनिः स्वयंजातो वैखानः सामगायनः ॥ देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ११९

ज्ञानां गुह्यं ज्ञानयज्ञःइष्टफलाभिसंधिरहितो वा यज्ञः- तदभेदोपचारात् ब्रह्म यज्ञगुह्यं । अद्यते अत्ति च भूतानीत्यन्नं । अन्नमत्तीत्यन्नादः । सर्वं जगदन्नादिरूपेणाग्नीषोमात्मकमेवेति दर्शयितुमेवकारः च शब्दः सर्वात्मनामेकस्मिन्परस्मिन्पुंसि समुच्चित्य वृत्तिं दर्शयितुम् ॥ ११८ ॥ आत्मैव योनिरुपादानकारणं नान्यदित्यात्मयोनिः । निमित्तकारणमपि स एवेति दर्शयितुं स्वयंजात इति । प्रकृतिश्चप्रतिज्ञा दृष्टांतानुपरोधादित्यत्र स्थापितमुभयकारणत्वं हरेः । विशेषेण खननाद्वैखानः धरणींविशेषेण खनित्वा पातालवासिनं हिरण्याक्षं वाराहं रूपमास्थाय जघानेति पुराणे प्रसिद्धम् । सामानि गायतीति सामगायनः । देवक्याः सुतो देवकीनंदनः । "ज्योतींषि शुक्राणि च यानि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोके त्रयो लोकालोकपालास्त्रयीच । त्रयोग्नयश्चाहुतयश्च पंच सर्वे देवा देवकीपुत्र एवे"ति महा भारते। यतः स्रष्टा सर्वलोकस्य । क्षितेर्भूमेरीशः क्षितीशः दशरथात्मजः ९९० कीर्तितः पूजितो ध्यातः स्मृतः पापराशिं नाशयन् पापनाशनः । "पक्षोपवासाद्यत्पापं पुरुषस्य प्रणश्यति । प्राणा यामशतेनैव तत्पापं नश्यते नृणाम् । प्राणायामसहस्रेण यत्पापं नश्यते नृणाम् । क्षणमात्रेण त त्पापं हरेर्ध्यानात्प्रणश्यती" ति वृद्धशातातपवचनं ॥ ११९ ॥ पांचजन्याख्यं भूताद्यहंकारात्मकं शंखं बिभ्रत् शंखभृत् । विद्यामयोनंदकाख्योऽसिरस्येति नंदकी । मनस्तत्त्वात्मकं सुदर्शनाख्यं

शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः ॥ रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः सर्व प्रहरणायुधःओंनमइति ॥ १२० ॥

चक्रमस्यास्तीतिचक्री । संसारचक्रस्याज्ञयापरिवर्तइतिवाचक्री । इंद्रियाद्यहंकारात्मकं शार्ङ्गं नाम धनु रस्यास्तीति शार्ङ्गधन्वा । "धनुषश्च" इत्यनङ् समासांतः प्रत्ययः । बुद्धितत्त्वात्मिकां कौमोदकीना मगदां वहन् गदाधरः । रथांगं चक्रमस्य पाणौ स्थितं स रथांगपाणिः । अतएवाशक्य क्षोभण इत्यक्षोभ्यः । केवलं एतावंत्येवायुधान्यस्येति न नियम्यते अपि तु सर्वाण्येव प्रहरणान्यायुधान्य स्येति सर्वप्रहरणायुधः । आयुधत्वेनाप्रसिद्धान्यपि करजादीन्यस्यायुधानि भवंतीत्यंते सर्वप्रहरणायु ध इतिवचनम् सत्यसंकल्पत्वेन सर्वेश्वरत्वं दर्शयितुम् । "एष सर्वेश्वर" इति श्रुतेः द्विर्वचनं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समाप्तिं द्योतयति ॐनमइतिओंकारश्चांतेमंगलार्थः "ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कंठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभावि"तिवचनात् । अंते नम इत्युक्त्वा परिचरणं कृतवानिति "भूयिष्ठांते नम उक्तिं विधेमे"तिश्रुतेः । "धन्यं तदेव लग्नं तन्नक्षत्रं तदेव पुण्यमहः । करणस्य च सासिद्धिर्यत्र हरिः प्रांङ्मरिक्रियते" इति च । प्रागित्युपलक्षणम् अंतेपि नमस्कारस्य शिष्टैराचरणात् नमस्कारफलं प्रागेव दर्शितम् "एकोपिकृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय" ॥ "अतसीपुष्पसंकाशंपीतवाससम च्युतम् । ये नमस्यंति गोविंदं न तेषां विद्यते भयम् । लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रण

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ॥ नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ २१ ॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ॥ नाशुभं प्राप्नुयात्किंचित्सोमुत्रेहच मानवः ॥ २२ ॥

म्यशिरसाप्रभविष्णुमीशम् । जन्मांतरप्रलयकल्पसहस्रजातमाशु प्रशांतिमुपयाति नरस्य पापम् ॥ १००० ॥ ॥ १२० ॥ ॥ इति नाम्नां दशमशतं विवृतम् ॥ ॥ इतीदमित्येतेन नामसहस्रमन्यूनातिरिक्तमिति दर्शयति । दिव्यानामप्राकृतानां नाम्नां सहस्रं प्रकीर्तितमिति वदता प्रकारांतरेणापि संख्योपपत्तिर्दर्शिता ॥ १२१ ॥ प्रक्रमे "किंजपन्मुच्यते जंतुरि"ति जपशब्दोपादानात् । कीर्तयेदित्यनेनापि त्रिविधजपो लक्ष्यते । उच्चोपांशुमानसलक्षणस्त्रिविधः । यइदंशृणुयादित्यादिःस्पष्टार्थः । परलोकप्राप्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यापि नहुषादावशुभप्राप्त्यभावं सूचयितुममुत्रेत्युक्तम् ॥ १२२ ॥ वेदांतानामर्थं ब्रह्म गच्छत्यवगच्छतीति वेदांतगः । "किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनादितिवचनात् । जपकर्मणा साक्षान्मुक्तिरशंकायां कर्मणां साक्षान्मोक्षहेतुत्वं नास्ति ज्ञानेनैव मोक्षइति दर्शयितुं वेदांतगो ब्राह्मणः स्यादित्युक्तम् । कर्मणांत्वंतःकरणशुद्धिद्वारेण मोक्षहेतुत्वम् । "कषायपक्तिः कर्माणि ज्ञानंतुपरमागतिः कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते । नित्यं ज्ञानं समासाद्य नरो बंधात्प्रमुच्यते । धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोधिगम्यते । योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये । कर्मणा बध्यते जंतुर्विद्ययैव विमुच्यते । तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः । यथोक्तान्यपि कर्माणि परिहाय

वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्॥वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् २३

द्विजोत्तमः । आत्मज्ञानेशमेचस्याद्वेदाभ्यासेचयत्नवानि"तिमानवंवचनं । तपसा कल्मषं हंति विद्ययामृतमश्नुते इति । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनी"त्यादिस्मृतिभ्यश्चतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेन "येनकेनचिद्यजतापि यज्ञेनापिदर्विहोमेनानुपहतमना एव भवती"त्यादिस्मृतिभ्यः । ज्ञानादेव मोक्षः । "ब्रह्मविदाप्नोति परं । तरति शोकमात्मवित् । ब्रह्मविद्ब्रह्मैव भवति । ब्रह्मैव सन् ब्रह्माप्येति तमेव विदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेति विद्वान्नबिभेतिकुतश्चन इहचेदवेदीदथसत्यमस्ति । नचेदिहावेदी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्महतीविनष्टिः । यदाचर्मवदाकाशं वेष्टयिष्यंति मानवाः तदाशिवमविज्ञाय दुःखस्यांतो भविष्यति । नकर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परांतकाले परामृताः परिमुच्यंति सर्वे" । इत्यादिश्रुतिभ्यः । शूद्रः सुखमवाप्नुयादिति श्रवणेनैव । नतुजपयज्ञेन । "तस्माच्छूद्रोयज्ञऽनवक्लृप्त" इतिश्रुतेः । "श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतइत्यादिना महाभरतादिश्रवणमनुज्ञायते । "सुगतिभियाच्छ्रवणाच्चशूद्रयोनिरि"तिह

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम् ॥ २४ ॥ भक्तिमान्यः सदोत्थायः शुचिस्तद्गतमानसः ॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ २५ ॥ यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ २६ ॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥ २७॥

रिवंशे यच्चशूद्रःशृणुयात्ससुखमवाप्नुयात् इति व्यवहितेन संबंधः त्रैवर्गिकानांकीर्तयोदित्यन्तेन ॥१२३॥ चक्षुरादीनामात्मयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वनुरूपतः प्रवृत्तिः कामः प्रजायतइतिप्रजासंततिः ॥ १२४ ॥ भक्तिमानित्यादिना भक्तिमतः शुचेः सततमुद्युक्तस्यैकाग्रचित्तस्यश्रद्धालोर्विशिष्टफलाधिकारिणः फलविशेषंदर्शयति ॥ १२५॥ २६ ॥ २७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ १२८ ॥ १२९ ॥ १३० ॥ १३१ ॥ श्रद्धा आस्तिक्यबुद्धिः । भक्तिर्भजनतात्पर्यम् आत्मनः सुखं आत्मसुखं तेन च क्षांत्यादिभिश्च युज्यते ॥ १३२ ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिरितिञकारानुबंधरहितेन नकारेणसमस्तपदत्रयं क्रोधादयो न भवंति । मात्सर्यं च न भवतीत्यर्थः ॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्नआपदः ॥ २८ ॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण नित्य भक्तिसमन्वितः ॥२९॥वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ॥ सर्वपापविशुद्धात्मायाति ब्रह्म सनातनम्॥३०॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ३१ ॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥युज्येतात्मसुखक्षांतिःश्रीधृतिः स्मृतिकीर्तिभिः॥ ३२ ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥ भवंति कृतपुण्यानां भक्तानां पुरुषोत्तमे ३३ ॥ द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ॥ वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ ३४ ॥

॥ १३३ ॥ द्यौः सचंद्रार्कनक्षत्रेत्यादिना स्तुत्यस्य वासुदेवस्य माहात्म्यकथनेनोक्तानां फलानां प्राप्तिवचनं यथार्थकथनं नार्थवाद इति दर्शयति ॥ १३४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ३५ ॥ ३६ ॥ "सर्वागमानामाचारः प्रथमं परिकल्प्यते । आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युत" इत्यनेनावांतरवाक्येन सर्वधर्माणामाचरवत एवाधिकार इति दर्शयति ३७ ३८ ३९ ४० इमं स्तवमित्यादिनामसहस्रशाखाज्ञेन सर्वज्ञेन भगवता कृष्णद्वैपायनेनसाक्षान्नारायणेन कृतमिति सर्वैरर्थिभिःसादरं प

ससुरासुरगंधर्वं सयक्षोरगराक्षसम् ॥ जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ ३५॥ इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः॥ वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ ३६ ॥ सर्वागमानामाचारः प्रथमं परिकल्प्यते ॥ आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ ३७ ॥ ऋषयः पितरो देवा महाभूतानिधातवः ॥ जंगमाजंगमं चेदं जगन्नारायणोद्भवम् ॥ ३८ ॥ योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वंजनार्दनात् ॥ ३९ ॥ एका विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रीँल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥ ४० ॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ ४१ ॥

ठितव्यं सर्वफलसिद्धय इति दर्शयति । विश्वेश्वर मित्यादिना विश्वेश्वरोपासनादेव स्तोतारस्ते धन्याः कृतार्थाः कृतकृत्याइति "आदरेण यथा स्तौति धनवंतं धनेच्छया । तथाचेद्विश्वकर्तारं को न मुच्येत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बंधनादि"ति व्यासवचनं । प्रमादात्कुर्वतां कर्मप्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ १४१ ॥ १४२ ॥ १४३ ॥ १४४ ॥ १४५ ॥ सहस्रनामसंबंधव्याख्या सर्वसुखावहा ।

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ॥ भजंति ये पुष्कराक्षं न ते यांति पराभवम् ॥ ४२ ॥ अर्जुनउवाच ॥ पद्मपत्र विशालाक्ष पद्मनाभ सुरोत्तम ॥ भक्तानामनुरक्तानां त्राता भव जनार्दन ॥४३॥ श्रीभगवानुवाच ॥ यो मां नामसहस्रेण स्तोतुमिच्छति पांडव सोहमेकेन श्लोकेन स्तुत एव न संशयः ॥ १४४ ॥ नमोस्त्वनंताय सहस्रमूर्तये सहस्र पादाक्षिशिरोरुबाहवे ॥ सहस्रसानाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥१४५॥ ॥ इति विष्णुनामसहस्रस्तोत्रम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥ १ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकराचार्य विरचितं विष्णोर्नामसहस्रभाष्यं समाप्तम् । एतेषांसहस्रनाम्नांसंख्येयं ॥ अच्युतः १०० ॥ सिंहः २०० ॥ युगादिकृत् ३०० ॥ अनयः ४०० ॥ भोक्ता ५०० ॥ शिवः ६०० ॥ सत्कृतिः ७०० ॥ सुवर्णबिंदुः ८०० ॥ अप्ययः ९०० ॥ सर्वप्रहरणायुधः १००० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एनापुरेइत्युपनामकबालाचार्यात्मजोद्धवाचार्यैः

सावंतवाडीस्थपित्रेइत्युपनामकयेसंभट्टात्मजकृ

ष्णशास्त्रिभिश्चःसंशोधितमिदं पुस्तकम् ।

'गोपाळनारायण कंपनी' इत्याख्यजनतायायंत्रालयेपिट्टे

उपाख्यकृष्णात्मजरामचंद्रेणयन्त्राधिपतयेङ्कित्वाप्रका

शितम् शकाब्दाः १८१६ जयनामसंवत्सरे

ख्रिस्ताब्दः १८९४ (मे मासि)

मुद्रणं समाप्तिमगात्

सन १८६७ च्या पंचविसाव्या आक्टाप्रमाणं ह्या ग्रंथाचे सर्व हक्क गोपाळ नारायण

कंपनी, मालक, ह्यानीं आपल्याकडे ठेविले आहेत.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ इति सभाष्यं विष्णुनामसहस्रः समाप्तः ॥

चार्य
हिः २०० ॥
ड़ः ८०० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri